CC-0. In Public Domain. Digitization by eGangotri

नं. १५३५

R.
20

तरङ्गिणी

म. मा. वि. २०४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदर्थमेव

(नेपालकविकुलावतंसैः श्री म. वी. वि. शाहमहोदयैर्नेपालिभाषायां विरचय्य संकलितस्य 'उसैको लागि' इति कवितासमुच्चयस्य संस्कृतरूपान्तरम्)

लेखकः

श्री म. वी. वि. शाहः

रूपान्तरयिता

पूर्णप्रसादः 'ब्राम्हणः'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशकम्-

नेपालराजकीयप्रज्ञाप्रतिष्ठानम्
काष्ठमण्डपस्थम्

प्रथमं संस्करणम् – १०००

प्रकाशनतिथिः – लक्ष्मीपूजा (वि. सं. २०२६)

891.461
SHA

मूल्यम् –

016962

मुद्रकः– राजकीयमुद्रणालयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्री ५ महाराजाधिराजाः महेन्द्रवीरविक्रमशाहदेवाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुलपतेर्मन्तव्यम्

राष्ट्रनायकैः श्री ५ महाराजाधिराजचरणैरुक्तमस्ति--"साहित्यस्य, कलायाः, ज्ञानविज्ञानयोश्च क्षेत्रेषु पुराकालात् हिमवत्खण्डेन भूयोभूयः प्रदीयमानस्य योगदानस्य विशेषतो महत्त्वमस्ति" इति ।

युक्तमेतत्, हिमवत्खण्डस्य साहित्ये जीवनस्य न केवलं माधुर्यमूलोन्मेषस्य, अपितु तन्निष्ठाया अध्यात्मप्रतिष्ठायाः हेतोः सौन्दर्यस्य कलेवरमपि संगीतपूर्णं जातमस्ति । कलायामपि न केवलं जीवनेन निर्विश्यमानानां संख्यातीतानां द्वन्द्व-विविधतानाम्, अपितु पुरस्कृतानन्ताकाशस्य हृदयस्याऽपि ऐन्द्रधनुषी स्वीकृतिरस्ति। तथा न केवलं ज्ञाने बुद्धेर्नीरसयोरूहापोहयोः, अपितु सच्चितोरेकतायां तादात्म्य-भाजः आनन्दस्याऽपि अखण्ड आलोकोऽस्ति ।

अतएव अस्मद्राष्ट्रनायकाः श्री ५ महाराजाधिराजचरणाः हिमवत्खण्डस्य गौरवपूर्णपरंपरायां समापतितम् अवरोधमपाकर्तुम् नेपालराजकीयप्रज्ञाप्रतिष्ठानस्य संस्थापनं कृतवन्तः । चरणैरुक्तमप्यस्ति--'ऐतिहासिककारणवशात् उपर्युक्तपरं-परावर्त्मनि आपतितं व्यवधानं निराकृत्य देशस्य मौलिकपरंपरां युगोचिते मार्गे अग्रेसरीकर्तुं नेपालराजकीयप्रज्ञाप्रतिष्ठानं समीहते' ।

अहं न केवलमाशासेऽपितु पूर्णतया विश्वसिमि च, यत्–प्रज्ञाप्रतिष्ठानम् राष्ट्र-नायकचरणैर्निर्दिष्टे पथि निरन्तरमग्रेसरं सत् देशस्य बौद्धिकीस्तथा मानसिकीश्च आवश्यकताः क्रमशः पूरयिष्यति, एवं देशान्तरेष्वपि अस्मज्जीवनस्य न केवलं रूपसौन्दर्यस्य अपितु कर्मसौन्दर्यस्य, शीलसौन्दर्यस्य च परिचयदानायाऽपि सफलं भविष्यति ।

केदारमानः 'व्यथितः'
कुलपतिः
नेपालराजकीयप्रज्ञाप्रतिष्ठानस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशकीयम्

श्री म. वी. वि. शाहोऽस्ति नेपालिसाहित्यस्य शृङ्गारवीरकरुणरसेषु सिद्धहस्तः कविः । तस्य गीतेषु उपलभ्यते मार्मिकवेदनायाः, अदम्योत्साहस्य च संमिश्रणम् । यत्रेतरे आहतहृदयेन कुण्ठन्ति, तत्रैव स स्वं भारम् उत्तोल्य सोत्साहम् उद्यच्छति । प्रस्तुतपुस्तकस्य रचनावेलायाम् तस्य प्रथमपत्न्याः स्वर्गवासो जात आसीत् । तदैव स नेपालीयजनताया अधिकाररक्षायै संघर्षरत आसीत् । पत्नीविरहजन्मा एकः स एव करुणरसो न केवलं द्वितीयपत्नीप्रीतेः, प्रजातन्त्रस्य च प्राप्तौ निमित्तीभवति, अपि तु 'एको रसः करुण एव निमित्तभेदात्' इतिवत् शृङ्गारवीर-रसरूपेऽपि परिणमते । तस्य गीतानि आराजप्रासादम् आग्रामकुटीरं च समान-रूपेण गीयन्ते । हिमाचलस्य देवदारुवनत आरभ्य समतलभूमेः आम्रकाननं यावत् एषां गीतानां ध्वनिप्रतिध्वनयः प्रसृताः सन्ति । सोऽयं कविरेवाऽस्माकं प्रियो राजा श्री ५ महेन्द्रवीर विक्रमशाहदेवोऽस्तीति अस्मास्वस्ति महीयान् गर्वगौरवानुभवः ।

'तदर्थमेव' 'उसैको लागि' इत्यस्य संस्कृतरूपम् । नेपालराजकीयप्रज्ञा-प्रतिष्ठानस्य पद्यसाहित्ययोजनया नेपालिभाषाया उत्तमपुस्तकानाम् भाषान्तरेषु रूपान्तरकरणाय यत् लक्ष्यीकृतम्, तदनुसारम् प्रकाशितं प्रथमं पुस्तकमेतदस्ति ।

अस्य पुस्तकस्य अनुवादकः श्रीपूर्णप्रसादः 'ब्राह्मणः' संस्कृतस्य अद्वितीयः कविरस्ति । प्रसादगुणो, नवविचारश्च स्तोऽस्य द्वे वैशिष्ट्ये । अनुवादे मूल-पुस्तकस्य भावो यथायथं सुरक्षितोऽस्ति । अनुवादे अस्त्येतदपि अन्यत् वैशिष्टयम्, यत्–पठतां स सत्यं मौलिक इव आभाति । तस्य अस्याः सफलताया बोधः पाठकेषु स्वत एव भविष्यति ।

माधवप्रसादः घिमिरे
पद्यसाहित्यविभागस्य आयोजकः
सदस्यः
नेपालराजकीयप्रज्ञाप्रतिष्ठानस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मत्कथनम्

'उसैको लागि' इति कृतिः नेपालकविकुलतल्लजेन तत्र श्रीमता म. वी. वि. शाहेन विरचितानाम् विभिन्नसन्दर्भाणां कवितानाम् संकलनम् । अस्ति तस्या जातं, जायमानं च विभिन्नासु भाषासु रूपान्तरणम् । एतत् 'तदर्थमेव' अपि अस्ति तस्या एव कृतेः संस्कृतरूपान्तरम् ।

प्रत्येकं भाषाणां भवतः स्वं स्वं रूपम्, अभिव्यक्तिशैली च । तासां रूपान्तर-करणावसरे तयोरनुकरणम् एकतो न संभवति, अन्यतः तथाकरणम् क्वचित् क्वचित् अनर्थाय च भवति । अतो वरं रूपान्तरणे मूलभाषायाः भावपक्षोऽनुवादकैः संरक्ष्य इत्येव हि अनुवादकीया न्याय्यदृष्टिपरंपरा ! अतस्तद्विषयेऽस्म्यहं यथाशक्यं सजागरः । तथात्वेऽपि कियद् वा साफल्यम् उपलब्धम् मया ? इति संभवेत् प्रश्नः । यदुत्तराय नाऽस्ति मामकीनोऽधिकारः । स तु विज्ञपाठकानां निष्पक्षस्य समीक्षणस्यैव सविवेकस्य विषयः । विद्वत्संमतं च तत् -- 'आपरितोषात् विदुषां न साधु मन्ये प्रयोगविज्ञानम् '!

अनुवादावसरे कतमद् वा छन्द आलम्बनीयम् ? इति मनसा प्रश्नः कृतः । तत्कालमेव बुद्धिः सोपपत्ति तत् समाधत्त– 'लेखकमहोदयेन मूलकविता अस्माकं लोकगीतच्छन्दसि प्रायो लिखिताः सन्ति । तस्मिन्नेव छन्दसि रूपान्तरिते अनभ्या-सात्, अपरिचयाच्च विदेश्याः संस्कृतविद्वांसः सलयं, सरसास्वादं च एताः कविताः पठितुं नो पारयिष्यन्ते । एतेनैव हेतुना तदवसरतस्तेषां वञ्चनं नो सर्वथा युक्तम् । अतः शास्त्रीयपरंपरानिष्ठे कस्मिंश्चिदपि वार्णिकच्छन्दसि रूपान्तरणम् कर्तव्यम् । इति " । अन्ते तथैव निर्णीतम्, आचरितम् च ।

किञ्च--याः कविता (गीतानि) ध्वनिधान्यां (रिकार्ड) समूल्याङ्कनम् अन्तर्मुद्रिताः सन्ति ! का नेपालीयाः काश्च विदेश्याः ! गायिकाः स्वीयं स्वरमधु-रिमाणं सहस्रगुणमाकर्षकं कर्तुं या कविता औपयिकतयाऽऽकाशवाणीद्वारा नित्यशो गायन्ति ! कतिपया या विरहकविताः श्रावं श्रावं श्रावका आत्मानमपि विस्मृत्य स्वयं विरहाब्धौ मज्जन्तः स्वान्तरात्मनि मूर्तमिव करुणं साक्षात् कुर्वन्ति !, आधु-निकाश्लीलकवितानां भूयोभूयः श्रवणेन नासाः संकोचयताम् काव्यमर्मज्ञानां विदुषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरतः अनुभूतिपूर्णाभिः, सावरणाभिः मर्यादिताभिश्च कतिपयाभिर्याभिः शृङ्गार-कविताभिः स्वयं शृङ्गाररसः स्वस्य अनग्नसौन्दर्यस्य प्रदर्शनावसरोपलब्धेः अखर्वं गर्वते!, यास्तास्ताः कतिपयाः भक्तिकविता आकर्ण्य अस्माकं राष्ट्रियहिन्दुसंस्कारः स्वस्य प्रेष्ठं भक्तिरसं वर्तमाने भौतिके युगेऽपि जीवितम् अनुभवति !, एवं भक्ति-शृङ्गार-करुणधाराणां त्रिवेणीभूतेऽस्मिन् कवितासंकलनतीर्थे स्नायं स्नायं को वा सहृदयो मनीषी तृप्तिं लभेत ? इति नो मयाऽऽसां कवितानां कर्तव्या प्रशंसा । आकर्षकस्वगुणगरिम्णैव हि ताः सन्ति स्वयं प्रशस्ताः । सर्वे सन्दर्भाः पदविन्यासेन, बन्धेन, शैल्या वा स्वयं प्रमाणयन्ति प्रातिस्विकम् औचित्यम् । काव्यसिद्धान्त-विषये औचित्यसंप्रदायं सर्वसाधीयांसं मन्वानस्य मम कृते सर्वे सन्दर्भाः सन्ति हृद्याः, मोदावहाश्च ।

अन्यच्च– कस्यचिदपि वस्तुनः सतो गुणग्रामस्य अवर्णनम्, सतो वैशिष्ट्यस्य वाऽपलपनम् सर्वेषामपि मनुसन्तानानां सत्यमपराध एव भवति, विशेषतो धीराणाम् इति अस्य कवितासंकलनस्य अमूल्यप्रदानभूते द्वे भावने, ये जनहितस्य राष्ट्रोन्नयनस्य च संबन्धे स्तः, पाठकपुरतः उपन्यस्यामि–– (१) काव्यक्षेत्रे अस्मद्राष्ट्रनायकानां श्री ५ महेन्द्रवीरविक्रमशाहदेवानामेव हि नामान्तरम् म. वी. वि. शाह इति । देशस्य कोणकोणेषु, प्रजाजनगृहकुटीराणां द्वारद्वारेषु च वात्सल्यवशात् बंभ्रम्यमाणस्य अस्य कवेः राज्ञो लोकोत्तरां जनभावनां प्रमाणयन् परंपरातः प्रजानुभूतस्य दलनपीडनस्य विरुद्धम् अत्र साम्रेडम् आक्रोशोऽस्ति !––

"काश्चिदाढ्याः कतिपयाः याचमाना अकिञ्चनाः
नेता द्रष्टुं पारयेऽहं सन्ततीर्विषमस्थितीः" इति

तथा तेन सहैव तां पुराकालोपक्रमां हृदयविदारिणीं समस्यां समाधातुं मूर्तेनेव वीररसेण तेनैव कृतोऽस्त्यत्र स वीरोचितो मार्गनिर्देशः, यो राष्ट्रयुवकानां सुषुप्तां चेतनाम् उन्निद्रयति, अन्तःक्लीवताम् उन्मूलयति–

"नेपालमातृभूमेस्त्वं वीरविक्रान्तसन्ततिः
वीर ! स्वल्पं क्रममपि ह्यनिवर्त्याऽग्रतः सर !
... ... तवैवाऽयं नागरिकाधिकारोऽस्ति मिथो मिलन्
गृहाणैतम् अकिञ्चिद्भीः, यत् त्वं सत्यायुधो ह्यसि !'

(२) प्रकृतिवर्णनद्वारा बन्धसौन्दर्यसंवर्धनमिषेण तेनाऽत्र स्वदेशस्य प्राकृतिकसंपत्तिविषये घोषितो गर्वहुङ्कारोऽस्ति–

' नो कृत्रिमता क्वचिदस्त्यस्मिन्
यत्रैवाऽस्ति प्रकृतेः कोषः ' इति ।

तथा देशनिर्माणाय तेनाऽत्र अन्तरात्मनैव उद्घोषितो निर्विकल्पः स संकल्पश्चाऽस्तिः– .

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"आगच्छत रचयाम मिलित्वा
स्वस्तनमस्माकं नेपालम् !"

किञ्च– विश्वस्य नेपालराष्ट्रपरिचायनाय तेन कृतोऽत्र सत्प्रयासश्चाऽस्ति–

"एत्य विलोकय नेपालोऽयम्
यत्राऽस्माभिर्जन्म गृहीतम्" इति

उपर्युक्तभावनाद्वयतः 'उत्तरोत्तरं मुनीनां प्रामाण्यम्' इतिवत् तत्र कवे राज्ञः प्रतापमल्लस्य, तथाऽन्येषामपि स्वनामधन्यानां दिवंगतानां नेपालभूपतीनां महिमातिशयमप्यतिशयानेन कविप्रकाण्डेन तत्र श्रीमता म. वी. वि. शाहेन पञ्चायत–नवराजदर्शनप्रवर्तकत्वेन विश्वस्मिन् लब्धप्रसिद्धयोऽस्मद्राष्ट्रनायका वर्तमान-नेपालमहीमहेन्द्राः श्री ५ महेन्द्रवीरविक्रमशाहदेवा अपि शाश्वतेन यशसा, प्रभावेण च सत्यमवधीरिता एव । यतस्तेषामस्ति केवलम् एकमेव राज्यसिंहासनम् नारायणहिटीप्रासादे, परं राष्ट्रजीवनतत्त्वभूतस्य कवेः श्री म. वी. वि. शाहस्य तु श्रद्धासिंहासनानि एककोटिनेपालीयानां प्रत्येकं हृदयेषु पृथक् विराजन्ते ।

"मध्येसमुद्रं स्फुटिते घटे, तद्वर्ति वार्यपि
यथा समुद्रपयसा तादात्म्यं श्रयते, तथा
प्रयानि शून्यकामोऽहं विराजा तेन सात्मताम्
तत् प्रीत्या योजयन् सर्वान् नामरूपे त्यजान्यहम्"

इत्युपनिषत्सारभूतेन स्थितप्रज्ञदर्शनेन विश्वस्यैव चेतनसमाजान् आवर्जयतः श्री म. वी. वि. शाहस्य नैषा स्तुतिः केवलोऽर्थवादः । अपि तु यथार्थकथनमेवाऽस्ति । यतो विश्वगीतमहिम्नो ज्ञानवतो राज्ञो मैथिलस्य दार्शनिक उत्तराधिकारः अनेन प्रतिपालितोऽस्ति ।

अस्माकं राष्ट्रस्याऽयं सत्यं सौभाग्यातिशयो यत्– द्वित्रा एतादृशो विभूतयोऽत्र साक्षाद्भूताः, साक्षाद्भवन्त्यश्च सन्ति, याषु नृपत्वस्य, कवित्वस्य, दार्शनिकत्वस्य च अपूर्वः सङ्गमोऽस्ति । यत् विदेश्यानां केषाञ्चित् समाजचिन्तकानाम् 'अरिष्टोटल' प्रभृतीनां केवलं कल्पनाया विषय आसीत् । अस्तु ... ...

अन्ते– एतदनूद्य भगवत्याः सुरभारत्याः स्तुत्यं सेवावसरं प्रदत्तवते नेपाल-राजकीयप्रज्ञाप्रतिष्ठानाय भूयोभूयः कृतज्ञता धन्यवादांश्च समर्प्याऽहं विरमामि ।

–पूर्णप्रसादः ब्राह्मणः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुक्रमणिका

हे वीर हिँड अघि सरी	२	वीर ! गच्छाऽग्रेसरः	३
आमाको पुकार	४	मातुः आक्रन्दः	५
वास्तविकता	६	वास्तविकता	७
इच्छा	८	इच्छा	९
पाइन दर्शन तिम्रो	१०	नाऽप्नवं दर्शनं तव	११
आधार	१२	आधारः	१३
वन्दना	१४	वन्दना	१५
गोठाली नारीप्रति	१६	गोचारिकां प्रति	१७
के पायौ	१८	किम् अलभथाः	१९
सहिष्णुता	२०	सहिष्णुता	२१
आशाको चन्द्रमा	२२	आशाज्योत्स्ना	२३
स्मृतिको अङ्कमाल	२४	स्मृतेराश्लेषः	२५
कहाँ मेटिन्छ त्यो धर्को	२६	प्रोज्झ-यते कुत्र सा रेखा !	२७
म रुन्थें बेसरी एक्लो	२८	रोरुद्ये स्माऽहमेकाकी	२९
प्रश्न	३०	प्रश्नः	३१
बिर्सी जाने साथी	३२	विस्मृत्य गामिनि सखि !	३३
मनमन्दिरकी रानी छमछम गर्दै आऊ	३४	आयाहि मनोमन्दिरराज्ञि !	३५
हेर हेर यही हो हाम्रो जन्मभूमि नेपाल	३६	पश्य पश्य, अयमेव नो नेपालः !	३७
प्रगीत	४०	प्रगीतम्	४१
प्रीतिको पीडा	४६	प्रीतेः पीडा	४७
चांदनी दिलको थियो	४८	हृदो ज्योत्स्ना	४९
आंसु मिलेको हांसो	५०	साऽश्रु हसितम्	५१
तिमी	५२	त्वम्	५३
शक्ति देऊ हरि	५४	शक्तिं देहि हरे !	५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निवेदन	५६	निवेदनम्	५७
असमर्थता	५८	असमर्थता	५९
प्राकृतिक सौन्दर्य	६०	प्राकृतिकं सौन्दर्यम्	६१
के लेखुं दुःखमा	६२	किं लिखानि दुःखे ?	६३
हिम्मत नहार	६४	निःसाहसत्वं मा गाः !	६५
सपना	६६	स्वप्नः	६७
आफ्नो परिचय	६८	आत्मपरिचयः	६९
कसरी बुझाउं यो दिल	७०	सान्त्वयेयं कथं मनः ?	७१
जब प्यार परस्पर होला	७२	मिथः प्रेम यदा भवेत्	७३
खुशी छु दिल तपडनैमा	७४	प्रसन्नोऽस्मि विरहव्यथया	७५
ए पीर	७६	अयि चिन्ते !	७७
दिलको चैन गयो	७८	मनःशान्तिर्गता	७९
मुस्किल छ वहुत मुस्किल	८०	कठिनमतिकठिनम्	८१
भन के गरूं	८२	कथय किं करवाणि ?	८३
विरहावस्था	८४	विरहावस्था	८५
तिम्रो लागि	८६	त्वदर्थे	८७
बिलौना	८८	विलापः	८९
कसरी वेहाल दिल पाऱ्यौ ?	९०	कथं हृद् आकुलयः ?	९१
बढ्यो यो दर्द दिलको	९२	वर्धमाना हृद्व्यथा ?	९३
ए चांद बताऊ	९४	कलानिधे ! मां कथय	९५
सुनसान रातमा	९६	शून्यरात्रौ	९७
म आउनेछु तिमीलाई भेट्न	९८	आगमिष्यामि त्वया संगन्तुम्	९९
अचानक एक भेटैमा	१००	अकस्मादेकस्मिन्नेव सङ्गमे	१०१
शरणागतको पुकार	१०२	शरणागतस्य करुणाऽभ्यर्थना	१०३
जा ए पथिक ? जा	१०४	गच्छ त्वं हे पथिक !	१०५
संकल्प	१०६	संकल्पः	१०७
साथी न ता कोही थे	१०८	नाऽसन् केऽपि सखायः	१०९
दुखेको दिल टुटेको मन	११०	सव्यथं हृदयम् , भग्नं मनः	१११
अव्यक्त पीडा	११२	अव्यक्तपीडा	११३
एकान्तको गीत	११४	एकान्तगीतम्	११५
स्वदेशी गान	११६	स्वदेश्यम् गानम्	११७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सबभन्दा पहिले

लुकी संधै जो संसार हाँक्छ,
जसले नबोली सब काम टार्छ,
उसले गरोस् जय नेपाल देशको
देखूँ संधै 'म' हँसिला
नरनारी यसको ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वादौ

प्रशास्ति सर्वदा योऽन्तर्हित एव समं जगत्,
मौनमेवाऽस्थितः सर्वाः क्रियाः पारयते च यः,
सोऽस्य नेपालदेशस्य भूतिं कुर्याद्, यतः सदा
विलोकयानीह नरान् नारीश्च प्रहसन्मुखान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समर्पण

जिन्दगी क्षणिक हो– तैपनि
जीवन अत्यन्त विचित्र छ ।
जन्म मरण ईश्वरीय देन हो–
त्यो प्रकृति हो

कवि कविताको होइन–
कविता कविको हृदयको
पातलो छायाँ मात्र हो,
त्यो स्मृतिको

अमर चिन्ह पनि, समर्पण छ
यो – उसैको लागि – त्यो
मीठो स्मृतिलाई... ... ... ।

–लेखक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समर्पणम्

अस्त्येव क्षणिकं, किन्तु विचित्रं चाऽस्ति जीवनम्
जन्म मृत्युश्चेश्वरस्य प्रदाने, प्रकृतिर्हि सा !

नो कविः कविताधीनः, कविता हि कवेर्हृदः
केवलं प्रतनुश्छाया,ऽमरं चिन्हं च संस्मृते

'तदर्थमेव' तस्यै हि मधुस्मृत्यै समर्प्यते

—लेखक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[पहिलो मण्डल]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[प्रथमं मण्डलम्]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे वीर ! हिंड अगि सरी

हे वीर ! हिंड अगि सरी नहटाई पाउ रतीभरी,
यो मातृ–भूमि नेपालको भई वीर पराक्रमी सन्तति ।।

खुकुरी, संगीन, तलवार या हतियार जे, किन सामुमा
नपरोस्–यदि तिमि वीर हौ भने–वीरका ती छातिमा ।।

तिम्रै हो लेउ नागरिक हक, काँधमा काँधै गरी ।
सत्यता तिम्रो छ हतियार डर नलेऊ क्यै कति ।।

नडराइ सम्झी लम्कंदै हिंड ढाल यै हो देशको
जातमा जे छौं, सबै हौं एक सन्तति देशको

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीर ! गच्छाऽग्रेसरः

नेपालमातृभूमेस्त्वं वीर-विक्रान्तसन्ततिः
वीर ! स्वल्पं क्रममपि ह्यनिवर्त्याऽग्रतः सर--

वक्षस्तटेषु वीराणां, चेद्वीरोऽस्यात्ममः पुरः
करवालो, भुशुण्डी वाऽसिधेनुर्वा यदापतेत् !

तवैवायं नागरिकाऽधिकारोऽस्ति, मिथो मिलन्
गृहाणैतम् अकिञ्चिद्भीः, यत् त्वं सत्यायुधो ह्यसि !

जातिभेदेऽप्येकदेश-सन्तानाः स्मः, तदस्तभीः
बुद्धो द्रुतक्रमं गच्छ, चर्म[1] तद् देशगुप्तये !

---

१. चर्म = फलकः (ढाल इति नेपाल्याम्) । चर्म कृत्तौ च फलके इति विश्वः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आमाको पुकार

गर्छिन् पुकार आमा रोई कराइ जोडले–
'होईन मेरो भन्छिन् सन्तान थरी थरीका"

कोही धनी असाद्धे कोही गरीब माग्ने
सवतीन देख्न भन्छिन् सन्तान थरी थरीका ।
होईन मेरो भन्छिन् सन्तान थरी थरीका !

नाङ्गो छ आँग काहीं काहीं पोशाक मलमल
सक्तीन हेर्न भन्छिन् सन्तान थरी थरीका
होइन मेरो भन्छिन् सन्तान थरी थरीका

सुनको छ थाल काहीं काहीं छ पात खाली
सक्तीन सुन्न भन्छिन् सन्तान थरी थरीका
होईन मेरो भन्छिन् सन्तान थरी थरीका

भन्छन् महल कसैका काहीं छ झुत्रो झुप्रो
सक्तीन सहन भन्छिन् सन्तान थरी थरीका
होइन मेरो भन्छिन् सन्तान थरी थरीका !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातुः आक्रन्दः

क्रन्दन्ती, रुदती, तारं व्यथितं जल्पति प्रसूः–
"विविधा भिन्नपङ्क्तिस्था नैताः सन्ततयो मम !

काश्चिद् आढ्याः, कतिपया याचमाना अकिञ्चनाः
नैता द्रष्टुं पारयेऽहं सन्ततीर्विषमस्थितीः
विविधा भिन्नपङ्क्तिस्था नैताः सन्ततयो मम !

नग्नपृष्ठाः कति, तथा ह्यनर्घवसनाः कति
नैता द्रष्टुं पारयेऽहं सतन्तीर्विषमस्थितीः
विविधा भिन्नपङ्क्तिस्था नैताः सन्ततयो मम !

हेम्नः स्थालं क्वचित्, क्वाऽपि पार्णं, तदपि रिक्तकम्
नैव श्रोतुं पारयेऽहं सन्ततीर्विषमस्थितीः
विविधा भिन्नपङ्क्तिस्था नैताः सन्ततयो मम !

काश्चित् सौधाश्रयाः, काश्चित् जीर्णपर्णालयाश्रयाः
नैव सोढुं पारयेऽहं सन्ततीर्विषमस्थितीः
विविधा भिन्नपङ्क्तिस्था नैताः सन्ततयो मम !"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वास्तविकता

देखी बागमा कली रसीलो भंमरा ललचाउँछ ।
कली कली भै सदा रहन्न व्यर्थ किन भर्माउँछ ।।

प्रेमी बनेर भन्दछ फेरि मै हूँ प्रेमको प्यासी ।
नीरस बनाई जान्छ तुरुन्तै छोडी कली बिचरी ।।

प्रेमीहरूले प्रेम भनेर कलीलाई नै भन्दछन् ।
कली भित्रमा लुकीरहेको वासना सब भुल्दछन् ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वास्तविकता

रसोद्रिक्तां कलीं दृष्ट्वाऽऽरामे भृङ्गोऽनुरज्यते !
तच्चित्तविकृतिर्व्यर्था, नैकरूपा सदा हि सा !

प्रेम्णेऽहमेव तृषितोऽस्मीति प्रियतया ब्रुवन्
द्राग् जहाति स निर्मानां नीरसीकृत्य तां कलीम्

हन्त ! प्रणयिनां कल्यामेवाऽस्ति प्रीतिभावना
यत् तदन्तर्निगूढां तां वासनां विस्मरन्ति ते !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इच्छा

प्रीति गरेर सबमा, छोडूं नामनिशाना

पाप पुण्य दुइ साथ छ जाने, बाँकी प्राण पनि छोडेर जाने
रहंदो रहेनछ केही आखिर, छोडूं नाम निशाना ।।
प्रीति गरेर सबमा छोडूं नाम निशाना ।

प्राणहंस जब नभबिच उड्ला
काम गर्न यो देहले छोड्ला
कोमल शरीर भन्दथ्यो जसले
छि: छि: लैजा भन्ला । छोडूं नाम निशाना

सागरका बीच घडा फुटेका
पानी पानी मिली एक भए झैं
अन्त्य कालमा कामरहित भै,
सागरमा मिलिजाऊँ ।। छोडूं नाम निशाना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इच्छा

"प्रीत्या संयोजयन् सर्वान् नामरूपे त्यजान्यहम्"

नाऽन्ते स्वस्य कृते किञ्चिद् वर्त्स्यति, ह्यसवोऽपि ते
हित्वा यास्यन्ति, साकं तु यास्यतो धर्मदुष्कृते
तत् प्रीत्या योजयन् सर्वान् नामरूपे त्यजान्यहम्

यदोड्डीयेत नभसि प्राणहंसस्तदा वपुः
कार्यं त्यक्ष्यति, यः प्राक् तत् स्निह्यति स्म च 'मृद्विति'
सोऽपि तद् गर्हणीयं च क्षेपणीयं च मंस्यते
तत् प्रीत्या योजयन् सर्वान् नामरूपे त्यजान्यहम्

मध्येसमुद्रं स्फुटिते घटे, तद्वर्ति वार्यपि
यथा समुद्रपयसा तादात्म्यं श्रयते, तथा
प्रयानि शून्यकामोऽहं विराजा तेन सात्मताम्
तत् प्रीत्या योजयन् सर्वान् नामरूपे त्यजान्यहम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाइनँ दर्शन तिम्रो

नाथविना अर्को यहाँ खोजूँ हरे कहाँ ?
पाइनँ दर्शन तिम्रो अझै भन्दै जाऊँ कहाँ ?

हात जोडी बिन्ती गर्छु खोजूँ भनन कहाँ ?
आँखामा ता अदृश्य छौ दृश्य हुने कहाँ ?

जपमा या तपमा, मूर्तिमा या देहमा,
पुरुषमा या नारीमा–भनन छौ कहाँ ?

दर्शनलाई सुहाउँदो भैन ता भैगो हरे,
नाथविना अनाथ छु भन्ने त संझिदेऊ हरे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाऽप्नवं दर्शनं तव

अन्वेषयानि कतमं त्वदन्यमिह नाथ !, ते [1]
नो प्राप्तं दर्शनमिति क्रोशन् कुत्र व्रजान्यहम् !

बद्धाञ्जलिर्विपृच्छामि-- 'क्वाऽन्वेष्टव्योऽसि मे वद,
चर्मचक्षुरदृश्योऽसि जायेथाः कुत्र दृग्गतः ?

जपेऽसि किंवा तपसि, मूर्तौ किं वा कलेवरे ?
स्त्रियाम् उताहो पुरुषे, वद त्वं कुत्र वर्तसे ?

अहं त्वद्दर्शनाऽयोग्यश्चेन्मतस्तर्ह्यपि प्रभो !
त्वां विना यदनाथोऽस्मीत्येतत् स्मर्तव्यमेव ते

---

१. स्वतन्त्राऽव्ययशब्दत्वात्–लक्ष्मीपते ! तेऽङ्घ्रियुगम् इतिवत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आधार

भगवान् ! मेरो तेरो सिवा छैन सहारा
आधार मेरो तेरो सिवा छैन पराया

त्यो कुन वस्तु ल्याउँ, ल्याएँ भनी चढाऊँ ?
जो छ, सबै छ तिम्रै, के ल्याऊँ, र चढाऊँ ?

मैं हूँ, हो वा होइन, मेरै छ के ठेगाना ?
सर्वस्व हौ तिमी नै, तिमी नै के हौ, के होइनौ ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आधारः

त्वदृते भगवन् ! कोऽपि नैवाऽस्ति शरणं मम
त्वामन्तरेण नैवाऽन्यः संश्रयो वर्तते मम !

समर्पयेयम् आनीय कतमद् वस्तु ते प्रभो !
यद् आनीयेत, दीयेत तवाऽस्ति सकलं यतः !

अहमेवाऽस्मि नो वेति नास्ति निश्चप्रचं मतम्
असि त्वमेव सर्वस्वं, किं त्वं नाऽस्यथवाऽसि च !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वन्दना

सर्वस्व तर मेरो तिमी प्रभु ! गिरिधर ! नन्द ! किशोर !
श्याम ! राम ! भगवान् !

मित्र तिमी हौ गरीब द्विजको, शत्रु पनि तिमी कंसराजको–सर्वस्व०
सारथि हौ तिमी अर्जुनरथको, गोवर्धनधर ग्वालबालको–सर्वस्व०

पालक तिमी हौ भक्तहरूको, संहारक पनि दुष्टहरूको
लाज बचाउने हौ द्रौपदीको, मधुर मनोहर प्रेमीहरूको–सर्वस्व०

धनुषधर तिमी राम त्रेताको, नटखट चञ्चल द्वापरको
व्यापक छौ तिमी निराकारको, महान् शान्ति तिमी बुद्धको–सर्वस्व०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वन्दना

प्रभो मम तु सर्वस्वम् असि त्वं नन्दनन्दन !
श्याम ! गोवर्धनधर ! भगवन्! रघुनन्दन !

दीनद्विजस्य मित्रं त्वम्, अमित्रं कंसभूपतेः–प्रभो०
यन्ताऽर्जुनस्य, गोपालबालानां गिरिधारकः–प्रभो०

त्वं रक्षिताऽसि भक्तानां, संहर्ता च दुरात्मनाम्
ह्रीरक्षणोऽसि पाञ्चाल्याः मधुरश्चाऽनुरागिणाम्–प्रभो०

त्रेतायुगस्य रामोऽसि, धनुर्धारिभिरर्चितः
द्वापरस्य च कृष्णस्त्वं नाट्यचाञ्चल्यर्चितः
नैराकारा व्याप्तिरसि, महाशान्तिश्च गौतमी !–प्रभो०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोठाली नारीप्रति

बर्सातको साँझमा, सुनौलो घाममा ।
गाई हेर्ने गोठाली हरियो जङ्गलमा !!
मन्दिरका घण्टा बजे शङ्खध्वनि छर्दै
गाईहरू जम्मा भए अलि अलि गर्दै
पछाडिको डाँडामुनि जसै सूर्य डूबे
लालीपना बादलको हिमालमा पुगे
हाँसी हाँसी हिड्न थाली लौरो लिई हातमा
प्रकृतिकी सुन्दरी हरियो जङ्गलमा
कालो कालो वादलको बीचबाट च्याती
लुकामारी चन्द्रमाले खेल्न थाले माथि
गोरेटोको बाटो गरी गाऊँ घर पुगिन्
गाईहरू बाँधीवरी आँगनमा उभिन्
कैले पानी, कैले घाम बिजुली जुनीमा
स्वतन्त्रकी पुतली, हरियो जङ्गलमा !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोचारिकां प्रति

वर्षाकालिकसन्ध्याऽस्ति घर्मे हाटकरोचिषि
अस्ति गोचारिका काऽपि हारित्यमयकानने
नदन्ति बहवो घण्टाः सशङ्खध्वनि मन्दिरे
अभूवन् समवेताश्च सौरभेय्यः शनैः शनैः
तले पश्चिमशैलस्य यदाऽस्तमितवान् रविः
रक्तिमानो जलमुचां प्राप्तवन्तो हिमाचले !
हस्ते गृहीतदण्डा सा प्रकृतेः सुन्दराकृतिः
हासं हासं संप्रतस्थे हरितायां वनावनौ
मुहुर्निरीक्षमाणश्च श्यामश्यामतडित्वतः
मध्यतो निलयक्रीडां कर्तुं प्रारब्ध चन्द्रमाः
प्रयान्ती रथ्यया प्राप्ता सा स्वं संवसथं, गृहम्
निबध्य दामभिर्धेनूरतिष्ठत् प्राङ्गणावनौ
पतङ्गिका स्वतन्त्रा सा जीवने विद्युदस्थिरे
क्वचिद् घर्मं, क्वचिच्छायां लभते हरिते वने !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

के पायौ ?

चर्चरी चिरेर मुटू यो तिमीले के पायौ ?
कि मेरो भन्देऊ कसूर कि आई हेरिदेऊ

न चुँडी फाल्यौ न जोडी – हाल्यौ
यसरी नपार बीचमा, बिन्ती छ आइदेऊ ।

बुझिन पहिले सकिन अहिले
सहनु यो चोट एक्लो, बिन्ती छ सुनिदेऊ ।

कि आई जोड कि चुँडी फाल
नथाप निर्दयी पाशो, कि आई रेटिदेऊ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किम् अलभथाः ?

छित्त्वैतत् क्षततक्षं मे हृत्, किं ह्यधिगतं त्वया ?
आख्याहि– कोऽस्ति मे दोषः ?, किंवाऽऽगत्य विलोकय

न चुण्डित्वाऽक्षिपस्त्वं तत्, संयोजितवती च नो
संकटे क्षिप मैवं माम् आयाहि–– प्रार्थनाऽस्ति मे !

नाऽहं पुराऽवगतवान्, सांप्रतं च न शक्तवान्
एको व्यथाम् इमां सोढुं, शृणु रे ! प्रार्थनाऽस्ति मे !

योजयाऽगत्य, किमुत चुण्डित्वा परतः क्षिप,
छिन्ध्येत्य, किन्त्वकरुणां मा प्रसारय वागुराम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहिष्णुता

चोट दिलमै रातदिन, लुकाई आँसु झार्दछु ।
जिन्दगीभर आफ्नो तक्दीर तौलदै म जाँच्तछु ।।

पार टुक्रा यो कलेजा गर्नु संमन् जे गर ।
आफ्नू बर्वादीको सिकवा मुखमा किन ल्याउँछु ।।

गर्दिन फरियाद ओठले, चाहे जति दुश्मन बनून् ।
दर्द दिन्छौ ता म झन् झन् दिलमा अपनाउँछु ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहिष्णुता

पातयामि दृगम्भोऽहम् अजस्रं गुप्तहृद्व्यथः
आजीवनं स्वभाग्यस्य कुर्वे मानपरीक्षणे

खण्डशः कुरु हृद्, यद्वा शक्नुषे यत् तथा कुरु
स्वदुःस्थितेरभिव्यक्तिं वाचा किं करवाण्यहम् !

वर्धन्तां शत्रवो, दीनं मुखेनाऽभिव्यनज्मि नो
ददास्याधिं[1] यदि मुहुः, मनसाऽङ्गीकरोमि तम्

आधिम्=मनोव्यथाम् । पुंस्याधिर्मानसी व्यथेत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आशाको चन्द्रमा

अंधेरी रातको मेरो तिमी हौ आशको चन्दा ।
उदाई यो निराशाको छुटाऊ लौ सबै फन्दा ।।

म हूँ रोगी तिमी बेगर तिमी हौ औषधि मेरो ।
तिमी छौ देखने खाली बनी द्यौ औषधी मेरो ।।

गए जाओस् बरू ज्यान नै जनम्भर कुर्न राजी छु ।
नपाए औषधी तिम्रो हमेशा मर्न राजी छु ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आशा–ज्योत्स्ना

तामस्याम् अपि शर्वर्याम् आशाज्योत्स्नाऽसि शोभने !
उदित्याऽस्या निराशायास्तमस्तोमम् अपाकुरु

सामयोऽस्मि वियोगेन, त्वमेवाऽस्यौषधं मम
त्वमेव प्रेक्षिका मेऽसि, भव तन्मे भिषक्तमा

पणीकृत्याऽप्यसून् कुर्वे जीवने त्वत्प्रतीक्षणम्
त्वय्यौषधेऽनवाप्तायां वर्तिष्ये निधनस्पृहः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मृतिको अंकमाल

वर्षाको एक राति एक्लो थें कौशीमाथि
चारै तरफ अंध्यारो खालि थ्यो मेघ साथी

बादलको घुम्टो हाली लुकेथ्यो चन्द्र माथि
खलबल थियो यो मनमा थिएन साथ साथी

बिजुलीको त्यो चमकले हुन्थ्यो छिया यो छाती
बर्सन्थे अश्रुधारा बज्री 'त्यो' छातीमाथि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मृतेराश्लेषः

वर्षाक्षपाऽस्ति, परितो व्याप्नोति निविडं तमः
एकोऽस्म्यट्टोपरि, सखा केवलोऽस्ति बलाहकः

ऊर्ध्वं न्यलीयत विधुः कृतमेघावगुण्ठनः
अशान्तिरासीन्मनसि, न सखाऽसीत् सहाऽत्मना

हृत् छिद्यते स्म शतधा चाकचक्येन विद्युतः
वर्षन्ति स्माऽश्रुधाराश्च वज्रवत् तदुरस्तटे

१७१६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कहाँ मेटिन्छ त्यो धर्को !

कहाँ मेटिन्छ त्यो धर्को विधिले जो दियो लेखी
कहाँ मेटिन्छ त्यो तस्वीर जसै दिलमा लियो खिची

चलोस् आँधी यो दुनियाँको बहोस् आँसू बनी भल भै
कहाँ नासिन्छ त्यो मूर्ति अडेको दिलमा गाडी

बलेको दनदनी तातो त्यो राँको दिल चिता भै
जलन यो मेटिने हो र कठै त्यो आँसुले ढाकी

भनूँ हुँदैन भन्नु त्यो रहूँ चूप छैन शक्तिमै
देखाउँ चोट कसोरी त्यो दबेको भित्रको छाती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रोज्झ्यते कुत्र सा रेखा !

प्रोज्झ्यते कुत्र सा रेखा या स्वयं विधिना कृता
प्रोञ्छ्यते कुत्र तच्चित्रं यत् कृष्टं हृदि कर्हिचित् !

प्रकम्पनः प्रवहतु प्रवाहो वा जनाश्रुणः
प्रोज्झ्यते कुत्र सा मूर्तिः या निखाताऽस्ति चेतसि

दन्दह्यते मनोरूपा चिता, ज्वालोऽस्ति तापनः
शमनीयः कथं ताप एष हन्त ! दृगम्बुभिः

कथं ब्रवै उदीर्यं नो, कथं मौनी वसानि वा
दर्शयानि कथं वा तद् उरस्यन्तर्गतं क्षतम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म रुन्थें बेसरी एक्लो

म हुन्थें बेचयन सारै जसै सारा चयन गर्थे
म रुन्थें बेसरी एक्लो जसै सब मुस्कुराउँथे

जसै सुन्थें सुरीलो गीत छुटेको कण्ठ कोकिलको
चिरिन्थ्यो बेसरी छाती जसै सारा रमाउँथे

जसै देख्थें हंसिलो मुख ती सारा जोरिपारीका
म बग्थें आँसु भै आफैं जसै संझी म गाउँथें

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोरुद्ये स्माऽहमेकाकी

भवामि स्म विषण्णात्मा, रमन्ते स्म यदेतरे
रोरुद्ये स्माऽहमेकाकी, स्मयन्ते स्म यदा समे

शृणोमि स्म यदा श्रोत्रहरं कोकिलकूजितम्
विदीर्यते स्म मे वक्षो, रमन्ते स्म यदेतरे

पश्यामि स्म प्रमुदितं प्रतिस्पर्धिमुखं यदा
अश्रूभूतो वहामि स्म स्वयं गायन् स्मृतौ तव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रश्न

बताऊ न भगवन् ! मलाई बुझाई
चलेको छ तिम्रो के सृष्टि यसोरी ?
पऱ्यो बीच नाऊ हरे आज मेरो
भयो तीर टाढा संधै छट्पटाई ।

सुनाऊ न, आऊ कसूर के भो मेरो ?
पऱ्यो केर मर्नू नमर्दै मलाई
बरू देउ फाँसी मलाई, छु हाजीर
परन्तु बचाऊ 'उ' निर्दोषीलाई ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रश्नः

त्वमाख्याहि विश्वेश ! मां संप्रबोध्य
किमेवं चलन्त्यस्ति सृष्टिस्तवेयम्
विदूरेऽस्ति तीरं, तरी जीवनस्य
समेयं गता हन्त ! मध्येप्रवाहम्

ननु ! श्रावयाऽगच्छ मत् कोऽपराधोऽ–
भवत्, येन जीवन्मृतः कारितोऽस्मि
वरं मे बधः स्यात्, तमङ्गीकरोमि
परं रक्ष तां, याऽस्ति दोषेण हीना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बिर्सी जाने साथी

"बिर्सी जाने साथी !
कसरी बिर्सूं आउ सिकाऊ–"

यो खबर ली ए हावा !
जा उनी जहाँ छन्, यसरी भनिदे–
'सुखका दिन ती साथ बितेका
कसरी बिर्सूं आउ सिकाऊ'

यो सुना गै चाँदनी तँ
उनी जहाँ छन् सुखले, दुःख दी–
'दिलको दिलसंग मेल भएको,
कसरी बिर्सूं आउ सिकाऊ !'

बोकी मेरो आँसु ए बादल !
बर्सी, आखिर रोई भनिदे–
'पत्थरसंग के दिल साटचौ कि ?
कसरी बिर्सूं आउ सिकाऊ' ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विस्मृत्य गामिनि सखि !

विस्मृत्यैवं गामिनि सखि ! मे
विस्मर्तव्यं कथमथ शिक्षय !

मत्सन्देशं वात ! गृहीत्वा
यत्र भवेत् सा, श्रावय गत्वा–
'तत् सहनीतं सुखदिनजातम्
शिक्षय कथमथ विस्मरणीयम् ?'

ज्योत्स्ने ! निवसति यत्र सुखं सा
तत्र प्राप्य, श्रावय, दुःखय,
पृच्छ च–– 'मनसो मनसा मिलनम्
यदभूत् कथमथ विस्मरणीयम् ?

ऊढ्वा मम नयनाश्रु तडित्वन् !
वर्ष, बूहि स्वाश्रु विमुञ्चन्–
'किं पर्यददाः शिलया हृदयम् ?
शिक्षय कथमथ विस्मरणीयम् ?'

---

१ घञ्नार्थकान्तात् मिल इति प्रातिपदिकात् धात्वर्थे णिचि ल्युट् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनमन्दिरकी रानी ! छम छम गर्दै आऊ

मनमन्दिरकी रानी ! अब छम छम गर्दै आऊ, स्वागत गर्छु तिम्रो !
चारै तरफ बज्यो शहनाई,
शङ्खध्वनि अरू मङ्गलबाजा
थोत्रो आँसु फाल्दै
अब हाँसी हाँसी आऊ । म स्वागत गर्छु तिम्रो ।

जगमग घर भो, पूर्ण मुरादै,
झिलिमिली जीवन, नयाँ भरोसा
छटपटेको दिन बिर्सी
अब गाऊँ, संग संग आऊ
म स्वागत गर्छु तिम्रो ।

नवीन चन्दा, कली नयाँ भो,
नवीन हावा, नयाँ जवाना,
बिछुडका ती रात बिर्सी
अब संग संग जुनी बिताऊँ
म स्वागत गर्छु तिम्रो ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आयाहि मनोमन्दिरराज्ञि !

स्वागतयेयं 'छंछं'–शिञ्जित–
मायाहि मनोमन्दिरराज्ञि !
अनदन् परितः शङ्खाः सुषिरा
अन्यानि च मङ्गलवाद्यानि
अवरुन्धाना विफलाश्रुझरीः
आयाहि त्वं हासं हासम्
स्वागतयेयं 'छंछं'– शिञ्जित–
मायाहि मनोमन्दिरराज्ञि !

श्रीलं गेहं, पूर्णाऽऽकाङ्क्षा
जीवनमूढं, नव उत्साहः
विस्मृतवत्यथ दिवसान् कृच्छ्रान्
आगच्छ, समं संगायाव
स्वागतयेयं 'छंछं'– शिञ्जित–
मायाहि मनोमन्दिरराज्ञि !

इन्दुश्च नवः, कलिका च नवा
पवनोऽपि नवोऽथ युगं च नवम्
विस्मृतवत्यथ विरहनिशास्ताः
साकं जीवनमतिगमयाव
स्वागतयेयं 'छंछं'– शिञ्जित–
मायाहि मनोमन्दिरराज्ञि !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेर हेर ! यही हो हाम्रो (जन्मभूमि) नेपाल !

हेर हेर यही हो हाम्रो
जन्मभूमि नेपाल आएर
छैन कतै बनौटो स्वाँग
प्रकृतिको यहीं छ भण्डार !

झुल्क्यो जसै चन्द्रमा माथि
चाँदनीले हिमाल ढाकेर
झलमल रूपौलो रङ्ग
हुन्छ हेर किनारा उत्तर

छन् जहाँ ठूल्ठूला डाँडा,
झारी जल पहरा चिरेर
साल सल्लो गुराँस पाती
फुल्छ संगै चुँदरी भएर

झकमक गोरेटो बाटो
हुन्छ जहाँ लालपात फुलेर
बग्छ खोलो नदी र नाला
हृदय नै संगलो पारेर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्य पश्य, अयमेव नो नेपालः !

एत्य विलोकय नेपालोऽयम्
यत्राऽस्माभिर्जन्म गृहीतम्
नो कृत्रिमता क्वचिदस्त्यस्मिन्
यत्रैवाऽस्ति प्रकृतेः कोषः !

उदिते चन्द्रे हिमशैलं तम्
व्याप्नोति यदा तस्य ज्योत्स्ना
भास्वरवर्णं कीदृग् रुचिरम्
दृश्यं विलसति पश्योत्तरतः !

भेदितकटकाः स्रावितसलिलाः
यत्र महान्तः पर्वतभागाः
सममुत्फुल्लाः यत्र हि सुरसाः
सालाः सरला वनमुद्गाश्च

यत्र हि रथ्या रक्तदलानाम्
कुसुमैर्भूषितसर्वाङ्गाऽस्ति
यत्र नदीनदनिवहश्चाऽसौ
नृणां हृन्निर्मलयन् वहति !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खानी कति हाम्रै छ जहाँ
गाई गोठ, घण्ट र मन्दिर
कोइलीले वसन्त डाक्छ
कण्ठ खोली हाँगामा बसेर

छन् जहाँ विशाल मैदान
धान झुलिरहेको सम्थर
त्यो पनि हो नेपाल हाम्रै
दक्षिणको सुनौलो किनार

पूर्वतिर छ हाम्रो मेची
पश्चिममा काली है बगेर
हरिया छन् जङ्गल हाम्रै
जङ्गलको जन्तुले भरेर

भाषाभाषी अनेक हामी
जात भात जे भन्छ छंदै छ
छौं तर नेपाली सब
चन्द्रसूर्यध्वजाकै मुन्तिर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्राऽस्माक खनयो मन्दिर–
घण्टा गोष्ठैः सत्रा सन्ति
यत्र पिकश्चाऽनेकपशाखां
श्रित उच्चरवो मधुमाह्वयति !

अयमपि नेपालो दक्षिणतो
याऽस्ति तटी चामीकरदीप्तिः
यत्र विशालाः समभूम्यस्ता
आनतकणिशा आकर्षन्ति !

सा काली पश्चिमतो वहति
पूर्वस्यां सा मेची वहति
तेनाऽस्माकं वनभूर्हरिता
वन्यैः पशुभिर्व्याप्ता भवति

भाषाः सन्त्यस्माकमनेकाः
[1]जातानि यथास्वं, किन्त्वेकम्
नेपालित्वं पुष्पवदङ्कित[2]–
केतनमाश्रितमस्त्यस्माकम् !

---

१. जातिर्जातं च सामान्ये इत्यमरः ।

२. पुष्पवदङ्कितम् = चन्द्रसूर्याङ्कितम् । एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रगीत

आउ बनाऊँ साथ मिलेर
भोलिको यो हाम्रो नेपाल
चल्दैन जहाज कदापि नालमा
पारौं सागरतुल्य नेपाल–आऊ बनाऊँ०

जुन राष्ट्रको पृष्ठभूमि छ
विश्वभरिको उच्च हिमाल
त्यस राष्ट्रको गौरव राखौं
हाम्रै हो यो देश नेपाल–आऊ बनाऊँ ०

वीर कर्मठ सुन्दर चाम्रा
हामी हौं नरनारी यसका
साहित्य संगीत कला र कौशल
हाम्रै छ आफ्नै प्राचीनका–आऊ बनाऊँ०

काली गण्डक कोशी नाला
पर्वत सम्थर खंडहर डाँडा
हरिया बन सौन्दर्य भरेका
हाम्रै हुन् खेत धान झुलेका–आऊ बनाऊँ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रगीतम्

आगच्छत रचयाम मिलित्वा
श्वस्तनमस्माकं नेपालम्
पोतो न चलति कुल्यासलिले
कुर्मः सागरवन्नेपालम् ।। आगच्छत०

पृष्ठधरित्री यस्याऽस्ति जग-
दुच्चतमो हिमशैलस्तस्य
राष्ट्रस्याऽयं गरिमा रक्ष्यो
यन्नेपालोऽस्त्यस्मद्देशः ।। आगच्छत०

स्मोऽस्य नरा नार्यो वा वीराः
कर्मठसुन्दरसत्त्वजुषश्च
अस्ति प्रत्ना संगीतकला-
साहित्यसृतिः पृथगस्माकम् ।। आगच्छत०

सन्त्यस्माकं कालीगण्डक-
कोशीसरितो हरितवनानि
सुन्दरसुन्दरदृश्यान्येता-
न्यानतकणिशानि[1] क्षेत्राणि ।। आगच्छत०

---

१. आनतकणिशानि = विनम्रधान्यशीर्षकाणि । कणिशं शस्यमञ्जरीत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जुन देशमा विष्णु र बुद्ध
साथ संधै छन् लम्किएका
देशभक्तिले कुत्कुतिएका
नेपाली हौं नेपालका !

आउ बनाऊँ साथ मिलेर
भोलिको यो हाम्रो नेपाल ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्यं विष्णु (शम्भु) र्बुद्धश्च द्वौ
यत्र सहैव प्रगतिं कुरुतः
तस्य हि नेपालस्य वयं स्मः
पुत्रा भक्त्युत्कण्ठावन्तः

आगच्छत रचयाम मिलित्वा
श्वस्तनमस्माकं नेपालम् !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[दोश्रो मण्डल]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[द्वितीयं मण्डलम्]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रीतिको पीडा

आँधी बिचको बिचरो चरो सरी
छटपट पारीं गयो कसले ! कुन देश कसोरी ?

शीतल शान्ति हृदयनगरको
खलबल पारी गयो उसैले । कुन देश कसोरी ?

डगमग पारी जीवन सब यो
छोडि गयो संग आँधि कसैले

रात जुनेली झैं दिलबिच यो
बादल छाई गयो उसैले । कुन देश कसोरी ?

चैन हंसीलो रसिलो बेला
साटी गयो संग आँसु कसैले

इन्द्रधनु झैं रंगबिरङ्गी
सुन्दर याद लग्यो उसैले । कुन देश कसोरी ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रीतेः पीडा

मध्येप्रभञ्जनं दीनं विहङ्गममिवाऽकुलम्
विधाय मां काऽपि गता न जाने कुत्र वा कथम् ?

भङ्क्त्वा तां शीतलां शान्ति मम हृन्नगरे स्थिताम्
सैव याता, परं नैव जाने सा क्व गता कथम् ?

प्रकम्पयन्त्यवयवैः सहैतन्मम जीवनम्
याता काऽपि मया सार्धं संयोज्यैनं प्रभञ्जनम्

सैव ज्योत्स्नावदाते मे हृदाकाशेऽभ्रमालिकाम्
वितन्वती गता, किन्तु न जाने कुत्र वा कथम् ?

आत्मशान्ति, सहसितं सरसं समयं च तम्
परिदायाऽगमत् काऽपि स्रवता लोचनाम्भसा

सैवेन्द्रचापवच्चित्रविचित्रा मधुराः स्मृतीः
अनैषीत्, किन्त्वहं नैव प्रजाने कुत्र वा कथम् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चाँदनी दिलको थियो

चाँदनी दिलको थियो किन अन्धकार गरी गयो,
यदि विश्वको भए तुच्छ त्यो यस दिलको सर्वस्व थ्यो

सपना भनूँभने पनि यस दिलको बिपनै थियो,
बिपना भनूँ भने कठै ! प्रतिविम्ब मात्र भई गयो ।

संझी संधै ती बितेका चैन साथै जो थिए,
हुन्छु व्याकुल एकलो, आई लुटी कसले लगे !

बग्छ आँसू भन्दिए, सक्तैन रोक्न कसै गरे
प्रेमले सोही म गर्छु, अन्त्य तर्पण भन्दिए

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदो ज्योत्स्ना

आसीत् सा मे हृदो ज्योत्स्ना ! किं गता तन्वती तमः ?
गण्येत तुच्छा विश्वस्मिन्, सर्वस्वं ! सा हृदस्तु मे

जाग्रत्त्वात् चेतसो नो तत् स्वप्न आसीत्, न जागरा
छायावत् केवलं हन्त ! दर्शनान्निलयादपि

एकाकी व्याकुलश्चाऽस्मि गतस्मृत्यैव, ता मुदः
शान्ति च तां प्रसह्यैव का निनाय हृदो मम !

कथयाऽश्रु वहत्येव, सर्वथा नैव रुध्यते
अहं करिष्ये तेनैव स्निग्धम् अन्तिमतर्पणम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आंसु मिलेको हांसो

आशामहाँ अडेको दुनियाँमहाँ भुलेर
आँसू मिलेको हाँसो हाँसी रहेछौं हेर

आँखाकै अगाडि आए हजारौं रोई
त्यस्तै गए रुवाई कहाँ हो कुन्नि खोई

देखेर यै तमाशा भुलीरहेछौं कस्तो !
धन्य हो ! भुलभुलैया रूनु न हाँस्नु जस्तो

तर फूलमा मिलेको बास्नासरी त्यो काल
मिलीरहेछ तनमा संझाइ, बारंबार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साश्रु हसितम्

आशावलम्बितेऽस्मिन् जगति स्वयं विलुठितान्तरात्मानः
मिश्रितलोचनसलिलं हास्यं कुर्मो वयं विलोकयत !

पुरत एव लोचनयोर्जनाः सहस्रं रुदन्त आयाताः
तथैव ते प्रतियाताश्च रोदयन्तोऽपरान्, क्वचित् शून्ये

चित्रं दृष्ट्वाऽपीमां खेलां वयं स्मोऽतिशयमासक्ताः
धन्यो भ्रमो, यतोऽभूत् द्वैविध्यं–रोद्यमुत प्रहास्यमिति

पुष्पे यथैव गन्ध ओतप्रोतस्तथैव शरीरेऽपि
मृत्युर्वर्वर्त्येव स्मारयन्निव जगतः स–नाशस्य[1] !

---

१. अघीगर्थदयेशां कर्मणीति षष्ठी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिमी

संसारको सारको सार पनि बनी व्यापक छौ तिमी यहाँ वहाँ ।
सब प्राणीको प्राणको प्राण पनि बनी व्यापक छौ तिमी यहाँ वहाँ ।।

खानीका जति रत्नको ज्योति पनि तिमी नै त छौ ।
उर्लिदो त्यो अगाध सागरको पनि हर बूँद छौ ।।

किरणमा पनि तेजको कण बनी तिमी व्याप्त छौ ।
श्वास भै प्रत्येक पवनको आकाशमा तिमी टम्म छौ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वम्

विश्वस्य सारसारः सन्नपि व्याप्नोषि यत्र तत्र त्वम्
प्राणि–प्राण–प्राणः[1] सन्नपि व्याप्नोषि यत्र तत्र त्वम्

खनिजानां सकलानामपि रत्नानां च्छविस्त्वमेवाऽसि
उच्छलदुल्लोलवतः सिन्धोश्च पृषन्त्यपि त्वमेवाऽसि

व्याप्नोष्येतान् किरणान् कणकणरूपस्त्वमेव किरणानाम्
व्याप्नोषि तत् सुरवर्त्म प्रश्वासभूतस्त्वमेव पवनानाम्

---

१. प्राणि-प्राण-प्राणः = प्राणिप्राणानामपि सत्वभूत इत्यर्थः । प्राणो हृन्मारुते बोले काव्यजीवेऽनिले बले । पुंलिङ्गः पूरिते वाच्यलिङ्गः पुंभूम्नि चाऽसुषु- इत्यनुशासनात् अत्र प्राणशब्दस्य एकबचनत्वे न दोषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शक्ति देऊ हरि !

आँखाको नानी बनेर यस्तो शक्ति देऊ हरि
देख्न सक्ने अभेद सबमा तिम्रै मूर्ति हे हरि !

अगाध सागर, महान पर्वत,
शीत, उष्ण अनि तेजमा
ब्राह्मण, च्यामे, उड्ने पंछिमा,
हिंड्ने पशु जति हुन्, सबमा ।। आँखा०
बहने हावा, झर्ने झर्ना
पहरा, पत्थर, अघोर बनमा
पृथ्वी आकाश, मेघ, तारा,
पानीको हर बूँदमा ।। आँखा०
चेतमा, जड वस्तुमा
अनि चन्द्रमा, पनि सूर्यमा
सुखमा अनि दुःखमा
पनि रोगमा, नींद– स्वप्नमा ।।आँखा०
गरीब, पापी, दुष्ट, चोरमा
बडा प्रतापी, धनी, सबैमा
शिशुमा पनि तरुणमा
वृद्धमा अनि अन्त्यमा–आँखा०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शक्तिं देहि हरे !

नेत्रयोस्तारके भूत्वा तां शक्तिं देहि मे हरे !
अभेदं, तव मूर्तिं च द्रष्टुं सर्वत्र शक्नुयाम्
अगाधाब्धौ, महाशैले, शीत, उष्णे च तेजसि
भूमिदेवे, दिवाकीर्तौ, व्योमगामिनि पक्षिणि
तस्मिन् पशौ च यो भूमौ गच्छेद्, एवं समेष्वपि
वाति वायौ, प्रवहति निर्झरे, गिरिदन्तके,
प्रस्तरे, घोरविपिने, पृथिव्यां, सुरवर्त्मनि,
धूमयोनौ, तारकायां, बिन्दौ बिन्दौ च पाथसः
चेतने, जडजातौ वा नक्षत्रेशे, दिवाकरे
सुखे, दुःखेऽस्वस्थतायां, निद्रायां, स्वप्नदर्शने,
दीने, पापे, दुराचारे, चौरे, विक्रान्ततल्लजे,
सधने, शावके, यूनि, स्थविरे च तथाऽन्ततः
नेत्रयोस्तारके भूत्वा तां शक्तिं देहि मे हरे !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निवेदन

बनी यो सार जीवनको कहाँ छौ सर्वशक्तिमान् !
देखाई विश्वको माया छकायौ सर्वशक्तिमान् !

पठायौ जस्तरी यहाँ छ जानु सुस्तरी उस्तै
फिंजाई स्वादिलो पासो नबाँध सर्वशक्तिमान् !

म हूँ तिमी, तिमी मै हौ, नजानूँ भन्न– 'तँ र म'
नजाने के कसूर पाई धपायौ सर्वशक्तिमान् !

नपार सुर्कने पासो, लुकाई त्यो संधै अनुहार
सपार जिन्दगी बाँकी, छ बिन्ती सर्वशक्तिमान् !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निवेदनम्

सारभूतो जीवने क्व वर्तसे सर्वशक्तिमन् !
विश्वमायां दर्शयित्वाऽमोहयः सर्वशक्तिमन् !

प्रैषयोऽत्र यथा त्वं प्राक्, गम्यमस्ति तथा शनैः
प्रसार्य मोहपाशं नो बध्नीयाः सर्वशक्तिमन् !

अहं त्वम्, त्वमहं, नैव जानानि 'त्वमहं'–भिदाम्
न जाने केन दोषेणाऽदीदवः[1] सर्वशक्तिमन् !

ग्रन्थिपाशं द्रढय मा पिधायाऽजस्रमाकृतिम्
शेषमायुः सफलय–– प्रार्थये सर्वशक्तिमन् !

---

१. अदीदवः=दूरम् अकरोः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असमर्थता

आकाशका तिर्मिरे तारा म गन्न सक्तिनँ
मनको कुरा मुखमा ल्याई म भन्न सक्तिन

साउने झरी, ढुङ्गेलो बाटो बिर्सिन सक्तिनँ
बिर्सेर पनि त्यो दिन आज बिर्सिन सक्तिनँ

धाराको कुनानेरको भेट म भन्न सक्तिनँ
झरीको पछि लागेको जून बिर्सिन सक्तिनँ

जुनिलो छाया, मायालु मेल म भन्न सक्तिनँ
हातमा हात परेको बेला बिर्सिन सक्तिनँ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असमर्थता

व्योम्नः कर्बुरितास्ताराः संख्यातुं नाऽस्म्यहं क्षमः
मनोगतं मुखे कृत्वा व्यञ्जितुं नाऽस्म्यहं क्षमः

प्रावृड्वर्षशिलामार्गौ विस्मर्तुं नाऽस्म्यहं क्षमः
विस्मृत्याऽप्यद्य तदहः विस्मर्तुं नाऽस्म्यहं क्षमः

मेलनं चोपकूपं तद् व्याख्यातुं नाऽस्म्यहं क्षमः
वर्षान्त उदितां ज्योत्स्नां विस्मर्तुं नाऽस्म्यहं क्षमः

ज्योत्स्नाच्छायं स्निग्धयोगं चाऽख्यातुं नाऽस्म्यहं क्षमः
तं पाणियोगसमयं विस्मर्तुं नाऽस्म्यहं क्षमः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राकृतिक सौन्दर्य

तितरी पंखी बादलुमाथि सुनौलो साँझमा
वगेको खोला कलकल गरी जुनिलो रातमा
यता र उतो हरियो डांडा, निर्मल झरना
रूपौलो रङ्ग टाकुरो उच्चा क्या राम्रो हिमालमा
गोरेटो रातो माटोको राम्रो उकालो थलीमा
वराली त्यस्तै बाटोको ढुङ्गा झल्केको घाममा
कहीं छ सेतो, कहीं छ रातो पोतेको घरैमा
गाई र भैसी बाँधेको बारी हरियो पहाडमा
थाप्लोमा नाम्लो पीठमा डोको बोकेका मर्दाना
आँखामा गाजल कोरेकी मात्र पवित्र जनाना
हिमाली हावा संगलो पानी मलिलो माटोमा
हुर्केको नानी, हुर्केकी ठिटी नीरोगी माटोमा
न जालझेल, न रीसइवी जानेको पहाडमा
उडेकी चरी सरि छ सारा रमेको पहाडमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राकृतिकं सौन्दर्यम्

सा स्वर्णसन्ध्या, मेघः स चित्रस्तित्तिरिपुङ्खवत्
सा ज्यौत्स्नी, कल्कलिति सा प्रवहन्ती च निम्नगा !
इतस्ततश्च हरिताः प्रत्यन्तगिरयोऽमलाः,
निर्झराः, शृङ्गमुत्तुङ्गं हिमरम्यं हिमाचले !
तत्राऽरोहणभूमिष्ठं रक्तमृन्मञ्जु वर्त्म तत्,
अवरोहाऽध्वदृषदस्ताश्च घर्मविकस्वराः
शुभ्राः क्वचित्क्वचिद् रक्ता लिप्तधौतास्त आलयाः,
बद्धगोमहिषास्ताश्च वाटिका हरिताचले
शीर्षे शिक्यं, पिटं पृष्ठे वहन्ते ते हि पूरुषाः,
पवित्रा योषितो याश्च दधते कज्जलं दृशोः
हिमाद्रेः पवनः, स्वच्छं सलिलं, मृदुला च भूः
नीरोगमृत्तिकायां ता वर्धन्ते बालबालिकाः
न च्छलं, कपटं, क्रोध, ईर्ष्या वा ! शैलवासिनः
भवन्ति हि मिथः स्निग्धा उत्पतन्तः खगा इव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

के लेखूँ दुःखमा

हातमा मसी गहमा आँसू, के लेखूँ दुःखमा ।
न सकें मर्न, न रहूं वाँची रोएर दिनदिन ।।

दुःखका दिन म कति काटूँ गरेर विलौना ।
हरायो हाँसो सुनौला मेरो बेगर दर्शन ।।

लुकेर मात्र नआऊ विन्ती सुटुक्क नींदमा ।
आँखाको वाटो दिलमै पुगी गरन शासन ।।

विलाई कहीं नजाओस् मेरो रहेको बाँकी सास ।
सह्मालिदेऊ जुनिलो रातमा आएर बाँकी आश ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किं लिखानि दुःखे!

हस्ते मसी दृशोश्चाऽश्रु संकटे किं लिखान्यहम्
मर्तुं नाऽशक्नवं, नित्यं रुदित्वैव च जीवितुम्

विलप्यैवं यापयानि कति वा दुःखवासरान्
विना त्वद्दर्शनं नष्टं स्मितं स्वर्णप्रभं मम

प्रार्थना मेऽस्ति-- निद्रायामेव नाऽयाह्यलक्षिता
दृक्पथेन मनस्येव संप्राप्ता कुरु शासनम्

विलीय कुत्रचित् मास्म गमन्मे शेषजीवनम्
ज्योत्स्न्याम् आगत्य संरक्ष शेषामाशामिमां मम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिम्मत नहार

आँसू र हाँसोको यो संघर्ष जीवनीमा
हिम्मत नहार बिन्ती यो प्यारको सफरमा

जीवन त हाम्रो दिनरात बरबाद नै छंदै छ
आशा छंदै छ आवाद किन आँसु जिन्दगीमा

चीसो ती बूँद आंसू साथी यिनै छंदै छन्
दरकार परे तयार छौं तातो रगत दिनामा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निःसाहसत्वं मागाः !

त्वमश्रुहासयोरस्मिन् संघर्षमयजीवने
माभूर्निःसाहसा, प्रेम्णो मार्ग एष, तदर्थये

अस्त्येव स्वार्थहीनं तु जीवनं नौ दिवानिशम्
अस्त्येवाऽशा जीवने सा रूढा, कोऽर्थो दृगम्बुना !

शीतास्ते ह्यश्रुपृषताः सन्त्येव सखितां गताः
प्रयोजने च सज्जौ स्वः प्रदातुं तप्तशोणितम् !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सपना

एकान्त रात बीचमा हाँसेर पास आई
ब्यूझायो नींद बीचमा, हाय ! कसैले आई

देखी सरें अगाडी आशा लिई मिलनको
हाँसिन् मुसुक्क ब्यूँझें, सपना रहेछ खाली

हालें जसै अंगालो समाई केही तर्सिन्
चुम्बन गरें त ब्यूँझें सपना रहेछ खाली

झस्कें झसङ्ग आफैं, चर्क्यो चरक्क छाती
आँसू बहाइ ब्यूँझें सपना रहेछ खाली

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वप्नः

विजने मध्यरजनौ[1] हसन्ती काऽप्युपागमत्
प्रबोधं मामगमयत् हन्त ! सा निद्रितस्थितेः

तां विलोक्याऽग्रतोऽगच्छं मेलनाशां वहन्, स्मितम्
अकरोत् सा, प्रबुद्धोऽहं बभूव स्वप्न एव सः

तामाश्लिष्यम् यदा किञ्चित् त्रस्ता सा व्रीडया, ततः
प्रबुद्धोऽहं, यदाऽचुम्बं बभूव स्वप्न एव सः

अन्तःकम्पः समजनि, द्विधाभूतम् उरस्तटम्
वहदश्रु प्रबुद्धोऽहं, बभूव स्वप्न एव सः

---

१. शब्दार्णवे 'रात्री रात्रिस्तमस्विनी' इतिवत् अक्तितनः कृदिकारात् ङीषभावपक्षे, सप्तम्यां रजनौ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आफ्नो परिचय

अंधेरी रात हूँ त्यस्तो, कि चन्दा दूर भो जसको
सुकेको वृक्ष हूं बनको, हरायो पालुवा जसको

छु बाँकी ढल्न यो खाली सडी खोक्रो भई जड़मा
म हूँ वैली झरेको फूल, कि माली छैन झैं जसको

हूँ अन्धो अन्धकारैको, पडेको बीच बाटोमा
जलेको ताप हूं त्यस्तो, कि रापै छैन झैं जसको

छु बाँकी डुब्न यो खालि, परी हदम 'म' मझधारमा
डुबेको प्राणी हूँ त्यस्तो, किनारा दूर भो जसको

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मपरिचयः

अहं हि तामसी रात्रिः, यस्या दूरेऽस्ति चन्द्रमाः
वनशुष्कतरुश्चाऽहं यो जातः शीर्णपल्लवः,–

योऽस्मि सद्यः पातसज्जः सारहीनश्च मूलतः,
म्लानशीर्णमहं पुष्पम् उत यस्य न मालिकः

तमसोऽन्धोऽस्म्यहं, योऽस्ति मध्येवर्त्मनि दुर्गतः
प्रदग्धेन्धनखण्डोऽस्मि, यस्य नष्टोऽस्ति संज्वरः

सद्यो मज्जनसज्जोऽस्मि, मध्येस्रोतोऽस्ति यत्स्थितिः
प्राणी चाऽहं निमग्नः स यतो दूरेऽस्ति सा तटी !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कसरी बुझाउँ यो दिल

भन लौ तिमी नढाँटी कसरी बुझाउँ यो दिल
हेरेर खालि तस्वीर कति दिन बुझाउँ यो दिल

बिउँझे पनि म देख्छु तिमी नै म देख्छु नींदमा
दिनरात संझी खालि कसरी बुझाउँ यो दिल

तिमी ज्यान हौ यो ज्यूको तिमी प्राण जिन्दगीको
टाढा बसी कति दिन कसरी बुझाऊँ यो दिल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सान्त्वयेयं कथं मनः ?

ब्रूहि सत्यं कथङ्कारं सान्त्वयेयम् इदं मनः
कति वा दिवसान् हन्त ! केवलं चित्रदर्शनैः

त्वामेवाऽहं प्रपश्यामि कः स्वप्नः, का च जागरा!
सान्त्वयेयं कथं चित्तं स्मृत्यैवाऽहर्निशं तव

त्वं सत्त्वमसि देहस्य, जीवनस्यैव वाऽसवः[1]
कत्यहानि विदूरस्थः सान्त्वयेयम् इदं मनः !

---

१. असवः=प्राणाः । पुंसि भूम्न्यसवः प्राणा इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जब प्यार परस्पर होला

जब प्यार परस्पर होला--
अनि दुःखले उनी पनि रातमा
अति छटपट गर्दी होलिन् । जब प्यार०

रहनेछन् ती नैन खुला नै
धडकन दिलको झन् झन् बढ्ला
चन नपाई उनी पनि एक्ली
छटपट गर्दी होलिन् । जब प्यार०

अनि दिक्क भई संझेलिन् उनले–
पनि घटना सबै मिलनको
बारबार भई बेवस दुःखले–
उनले पनि लामो सास फेर्लिन् । जब प्यार०

अनि रहलिन् उनी पनि मौन भै
हर चोट सही टोलाई
निष्ठुरता उनले पनि संझी
धुरूधुरू एक्ली रोलिन् । जब प्यार०

जब मुस्किलले बन्द नैन भो
उनले पनि स्वप्ना देख्लिन्
सुन्दर स्वप्ना बीच मिली एक क्षण
उनी पनि झस्की उठ्लिन् । जब प्यार०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिथः प्रेम यदा भवेत्

असह्यं निर्विशेत् आधिं क्षपायां सा सुदुःखिता,
मिथः प्रेम यदा भवेत् !

निर्निमेषे दृशौ स्यातां, स्पन्देताऽतिक्रमेण हृत्
असह्यं निर्विशेद् आधिम् एकिका दुःखिता च सा
मिथः प्रेम यदा भवेत् !

विषीदन्ती स्मृतिं कुर्यात् संयोगघटनाश्च ताः
सा मुहुर्दुःखविवशा दीर्घनिःश्वसिता भवेत्
मिथः प्रेम यदा भवेत् !

एका निध्याय वर्तेत मौनं सोढ्वा मनोव्यथाः
सा रुद्यात् चाऽविरामेण स्मृतनिष्ठुरता ततः
मिथः प्रेम यदा भवेत् !

कृच्छ्रात् सनिद्रे दृग्युग्मे सा स्वप्नमवलोकयेत्
तत्र क्षणं लब्धसङ्गा सा प्रबुध्येत कम्पिता
मिथः प्रेम यदा भवेत् !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खुशी छु दिल तडपनैमा

खुशी छु, दिल तडपनैमा
म उनको याद पाऊँछु
सही तडपन जली दिलमै
म मुख यो बन्द गर्नेछु

संधै संझी उसैलाई
म यो जीवन बिताउँछु
उनी बेगर अनि दिनरात
म यो बेचैन सहनेछु

बनायो हाल जो मेरो
कहाँ आराम पाउँछु ?
कि दर्शनमै मिलनमै
फगत आराम पाउँछु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसन्नोऽस्मि विरहव्यथया

वियोगाऽधेः प्रसन्नोऽस्मि यतो भवति तत्स्मृतिः
सहिष्येऽतः समौनं तद् व्यथनं, तपनं हृदः

तस्याः स्मरन्नविरतं जीवनं यापयाम्यहम्
वियोगेऽहर्निशं तस्या निर्विशाम्यात्मशून्यताम्

यथा मेऽस्ति दशा हन्त ! क्वाऽत्मशान्तिमवाप्नुयाम्
सा संभवेद्, यदा ते स्यात् संयोग उत दर्शनम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ए पीर !

ए पीर ! भन्, कसले तँलाई पठायो ?
यो दिलमा धकेली, यो दिलमा धकेली

या कसैले दिल पनि दी
या पठायो एकलो ?
या तँ आइस हेर्न खालि
छट्पटेको दिल यो ?–ए पीर भन्

आँखामा आँखा जुधाई
दिल दिनु के बिर्स्यौ रे !
या त डरले त्यो कलीलो,
दिल हुँदा, दिन तर्स्यौ रे ?–ए पीर भन् !

प्रीतिको के रीत यही हो
चोटमा झन् चुट्नु ?
चर्किएको दिल थामी
पिई आँसु बाँच्नु ?–ए पीर भन् !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयि चिन्ते !

चिन्ते ! कथय मे चित्ते प्रेषिताऽसि कया बलात् ?
क्रियासमभिहारेण प्रवेश्य हृदये बलात् !

त्वां काऽपि स्वं मनो दत्त्वा प्रैषयत् ?, किमुतैकिका
केवलं द्रष्टुमायाता किं वा मे व्याकुलं मनः ?
चिन्ते ! कथय मे चित्ते प्रेषिताऽसि कया बलात् ?

दृग्भ्यां दृशौ योजयन्ती व्यस्मरस्त्वं हृदोऽर्पणम् ?
वा तत् मृद्विति जानाना संप्रदातुमगा भयम् ?
चिन्ते ! कथय मे चित्ते प्रेषिताऽसि कया बलात् ?

'क्षते प्रहार':– एषैव किं भवेत् प्रीतिपद्धतिः
यत्र भग्नहृदाऽगत्या पीत्वैवाऽश्रु प्रजीव्यते
चिन्ते ! कथय मे चित्ते प्रेषिताऽसि कया बलात् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिलको चैन गयो

दिलको चैन गयो छिनमा
मुखको हाँसो पनि
यो मनमा जब बस्यो कसैको
सुन्दर मूर्ति बनी–दिलको चैन ...

कुन बाटो गरी यसरी आयौं
कसरी चैन हटायौ ?
पापी आँखा के उसैको–
पलकमा लुकी आयौ ? –दिलको चैन...

लुकी दबीकन यो मनमा किन
व्यर्थ आई सतायौ
लुकेन आँसु ता कदापि
व्यर्थ किन लुकी रुवायौ ? –दिलको चैन...

विरहको थ्यो सानो झिल्को
लुकी फुकी सल्कायौ
भस्म पाऱ्यौ ता सबै, किन
आशा एक बचायौ ? –दिलको चैन...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनःशान्तिर्गता

क्षणात् भग्ना मनःशान्तिः, प्रनष्टमधरस्मितम्
यदा हृद्युदिता कस्याश्चन मूर्तिर्मनोरमा
क्षणाद् भग्ना मनःशान्तिः प्रनष्टमधरस्मितम्

निरहार्षीः पथा केनाऽगत्य शान्ति हृदो मम
वा निलीना त्वमायाता पक्ष्मणोः पापिनेत्रयो;
क्षणाद् भग्ना मनःशान्तिः ... ...

अज्ञातमागता चित्ते किं क्लेशयसि मां वृथा ?
अन्तःस्थातुमलं नाऽश्रु किं रोदयसि मां वृथा ?
क्षणाद् भग्ना मनःशान्तिः ... ...

चित्ते निलीय फुत्कृत्य विरहाग्निकणं लघुम्
अभस्मयः समं, किं ताम् एकामाशाम् अशेषयः ?
क्षणाद् भग्ना मनःशान्तिः ... ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुस्किल छ बहुत मुस्किल

मुश्किल छ वहुत मुश्किल सम्झेर भुल्नलाई
यो होइन जिन्दगी त्यो हाँसेर छोड्नलाई

देखाउँ यो सभामा देख्तैन मर्मलाई
सुनाउँ यो सजिलो गाह्रो छ बुझनलाई

दिलको छ यो सवालै दिलदिलको मिलाई
संझूँ त यो सजिलो गाह्रो छ भन्नलाई

टाढा रह्यो संधै ऊ, जो सक्छ बुझ्नलाई
भएनन् नजीक कोही खोई यो बुझ्नलाई

संझी संधै उ–उसले, उसले, अनि उलाई
हेर्नु छ यो सजिलो गाह्रो छ देख्नलाई

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कठिनमतिकठिनम्

कठिना कठिना सत्यं संस्मृतस्य हि विस्मृतिः
विहस्यैव न तत् त्याज्यमस्ति जीवनमञ्जसा

प्रदर्शयानि सदसि, दुर्दर्शं[1] ह्यस्ति मर्म तत्
सरलं श्रावयेयं, तद् दुर्बोधं चाऽस्ति शृण्वताम्

इयं प्रहेलिकैवाऽस्ति– 'मेलनं हि द्वयोर्हृदोः
यत् तदस्ति स्ववगमं, दुर्वचं च विवक्षताम्

या पारयेत विज्ञातुं सा सदा दूरतः स्थिता
न कोऽपि सन्निकर्षेऽस्ति यो विज्ञातुमलं भवेत् !

संस्मृत्य तेन तस्या वा तया तस्य च दर्शनम्
मन्येत सुकरं नित्यं, किन्त्वस्त्येतत् सुदुष्करम्

---

१. दुर्दर्शदशनोज्ज्वला इतिवत् खल्प्रत्ययः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भन के गरुँ ?

आँसु वहाऊ उता तिमी
यता म आह भर्दछु
मजबूर छौं लाचार छु
के गर्दछौ, भन के गरूँ ?

लाचार छु म त्यस्तरी
नजदीक भेकन दूर छु
तकदीरको लेखा कठै
के गर्दछौ भन के गरूँ

दिल छन् दुइ चूर चूर
टुक्रा कलेजा देख्तछौं
हाल यै यता छ, उता–
के गर्दछौ, भन के गरूँ ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथय किं करवाणि ?

अश्रु पातय तत्र त्वम्, अत्र वाष्पं वहाम्यहम्
विवशौ स्वः, कथय– किं करोषि, करवाणि वा ?

दीनोऽस्म्यहं, यदभ्यर्णमास्थितोऽप्यस्मि दूरतः
दैवेच्छेयं, कथय– किं करोषि करवाणि वा ?

पश्यावो मनसो युग्मं भग्नं, हृच्चाऽपि विक्षतम्
स्थितिरेषाऽत्र, किं तत्र करोषि, करवाणि वा ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विरहावस्था

'छटपट गरेर नै संधै बिती गयो नि रात' ।

दिनमा पनि कहाँ म, पाउंछु र चयन
तस्वीर उनकै सामने आएर दिन रात ।। छटपट ...

आई गयो वसन्त, ग्रीष्म, वर्षा पनि
आँसु बनेर नै गयो शरदको चाँदनी ।। छटपट ...

हेमन्तको बतासमा भयो निराश आश
शिशिरको तरु सरी सारा शरीर छ लाश ।। छटपट ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विरहावस्था

विरहाऽधीरया स्थित्या व्यतीता हन्त ! ता निशाः !

दिवाऽस्तु, किन्तु तत्राऽपि शान्ति प्राप्नोम्यहं कुतः ?
यत् तच्चित्राणि भासन्ते सर्वदा मद्दृशोः पुरः ।। विरहा०

एत्य प्रयातः स मधुः, स ग्रीष्मः, प्रावृषश्च ताः
अश्रूभूयैव संयाता हन्त ! ज्योत्स्ना च शारदी ।। विरहा०

आशा निराशा संजाता प्राप्ते हेमन्तमारुते
देहः शवायते साङ्गः स्थितः शिशिरवृक्षवत् ।। विरहा०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिम्रो लागि

न आयो नींद आँखामा न तिमी पासमा आयौ
गडाई संझना तिम्रै फगत यो दिलमा आयौ ।।

छ साथीसंगिनी तिम्रो दिलासा दिलमा देला
छ को मेरो तिमी बाहेक भरोसा दिलमा होला ।।

न राखें ख्याल इज्जतको न संझें आफ्नो कोही
गरेथें ज्यानको बाजी हो सत्य तिम्रै लागि

बित्यो वर्षा संधै पौडी तलाउ आँसुको पारी
कसोरी यो शरद् काटूँ, हमेशा झल्झली संझी ।।

पराई आफ्नो बन्धु, बनाई दुश्मनै दुनियाँ
छु राजी त्यागनु पर्दा परे यो त्याग्नै दुनियाँ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वदर्थे

आयाता नो दृशोर्निद्रा, न चाऽयाता त्वमन्तिके
आयाता हृदि मे तीव्रा केवलं स्मृतयस्तव

सन्ति सख्यस्तव यतो आश्वस्तं हृदयं भवेत्
मम तु त्वदृते का स्याद् यत् आश्वास्येत मे मनः

अजीगणं प्रतिष्ठां नो, कञ्चन स्वजनं न च
अपीपणम् असून् सत्यं केवलं तव लब्धये

निमज्ज्यैवाऽश्रुसरसि गता वर्षा अनारतम्
संस्मृत्य त्वाऽनिशमिमां नयानि शरदं कथम् ?

स्वबन्धवः परे सन्तु, विश्व एवाऽस्तु मे रिपुः
किं वाऽस्त्वयं लोक एव त्याज्यः संमतिरस्ति मे !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बिलौना

कति दिन काट्नु मैले बताऊ आश आशैमा
बनाई तिम्रो नै तस्वीर संधै मेरो मुटूबिचमा

जसै जम्मा भई मानिस रमाउंछन् ती आपसमा
चिरिन्छ भित्र दिल आफैं हुंदै छिया कलेजामा

अंध्यारो देख्छु दिउंसो नै विना तिम्रो म दर्शनमा
जहाँ जाऊं गरुं जे जे म देख्छु तिमी हर चीजमा

कहीं पाउन्न क्यै आराम टोलाउंछु संधै मनमा
परन्तु बन्द मुख गर्दै सहन्छु बेवसी दिलमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विलापः

आख्याहि मध्येहृदयं चित्राणि कलयन्, तव
नयेयमाशामालम्ब्य कति वा दिवसान् अहम् ?

संमिलन्तो यदाऽन्योन्यं रमन्त इतरे जनाः
तदा मे दूयते चित्तं, हृदयं च विदीर्यते

दिनेऽपि त्वय्यदृष्टायाम् अहं ध्वान्तं विलोकये
यत् कुर्याम्, यत्र वा यायाम् सर्वत्र त्वां विलोकये

न लभै क्वापि काञ्चिद् वा शान्ति, निध्याय चेतसि,
वाचं नियम्य विवशः सहाम्येता उरोव्यथाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कसरी बेहाल दिल पाऱ्यौ

"दिलमै बसेर मेरै बेहाल दिल पाऱ्यौ ?
यो हाल मेरो पाऱ्यौ !"

लुटेर चयन मेरो कसरी दियौ यो धडकन
जादू कि के कसोरी दिलमा संधै समायौ,
यो हाल मेरो पाऱ्यौ ?

बदलेर हाँसोलाई कसरी बनायौं आँसु,
तारा गनेर राती कसरी सिकायौ काट्नु,
यो हाल मेरो पाऱ्यौ !

टाढै लुकेर कसरी, दिन रात पास आयौ,
खोई दियौ तिमीमै यसरी नजर मिलायौ
यो हाल मेरो पाऱ्यौ !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथं हृद् आकुलयः ?

वसन्ती मे हृदि कथं तदेवाऽकुलयस्यहो !
एतद्दशं मां व्यदधाः !

हृत्वा शान्ति त्वमददाः कथं तत् कम्पनं हृदः
माया यथा कथं नित्यं हृद् गृहीतवती मम ?
एतद्दशं मां व्यदधाः !

त्वं पर्यणमयो हास्यं मामकं लोचनाम्बुनि
अशिक्षयश्च संख्याय ताराः नेतुं निशीथिनीः
एतद्दशं मां व्यदधाः !

निलीनाऽपि विदूरे त्वं कथं नित्यमुपागमः ?
अकरोश्चाऽत्मसात् त्वं मां पश्यन्ती मुग्धया दृशा !
एतद्दशं मां व्यदधाः !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बढ्दो यो दर्द दिलको

बढ्दो यो दर्द दिलको दिन दिन बढ्यो कसोरी ?
बिर्सनु बिर्साई के, बिर्स्यौं हरे कसोरी ?

देख्यो जसै नयनले दिलले संधै त्यो देख्यो
भन्देउ कोही आई बिर्सूं म दिल कसोरी ?—— बढ्दो ...

हरदम छ याद तेरो चर्चा छ तेरो हरदम,
गाह्रो भयो यो झन् झन् बिर्सूं हरे कसोरी ?

लागें जसै यों खोज्न अपनाउँ त्यो भनेर
संझी गऱ्यौ पराई बिर्स्यौं भनूं कसोरी ?— बढ्दो ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्धमाना हृद्व्यथा

कथं प्रावर्धत हृदि व्यथैषा प्रतिवासरम्
नैतद् विस्मारणीयं मे हन्त ! त्वं व्यस्मरः कथम् ?

प्रैक्षेतां यद् दृशौ, नित्यं तद्धि प्रैक्षिष्ट मानसम्
कामं विस्मारयेत् कश्चित् कथं तद् विस्मराम्यहम् ? –कथम्०

प्रतिक्षणं तवैव स्तः स्मृतिश्चर्चा च शोभने !
कष्टात् कष्टमिदं हन्त ! कथं तद् विस्मराम्यहम् ?

अन्वैष्यमधिकर्तुं, त्वं स्मृत्वाऽपि परभावतः
मामपश्यः, कथं ब्रूयाम्– 'विस्मृतोऽहमिति त्वया' ! –कथम्०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ए चाँद बताऊ

"ए चाँद बताऊ, ए चाँद बताऊ !"

पूर्ण चाँदनी रातबीचमा कसको याद यो आयो–
बिर्साइ अरु थोक विश्वको याद यो कसले पठायो
ए चाँद ...

बार बार कसको मुख संझी रातको नींद हरायो–
घायल दिलमा सुस्त लुकीकन कसले आइ सतायो ?
ए चाँद ...

दर्द छ दिलमा कसको लागि कसरी चैन हरायो !
बिर्सिनसक्नु प्यार यो कसको कसरी दिलमा आयो !
ए चाँद ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलानिधे ! मां कथय

"कलानिधे ! मां कथय, हिमांशो ! मामुदीरय"

ज्योत्स्नामये निशीथेऽस्मिन् किमीयाऽभूदियं स्मृतिः
विस्मार्य जगतोऽन्यार्थान् का प्रैषयदिमां स्मृतिम् ?
कलानिधे ! मां कथय, हिमांशो ! मामुदीरय

रात्रिनिद्रा मम गता मुहुः कस्या मुखस्मृतेः,
निलीय मे क्षतहृदि का वा मामकदर्थयत् ?
कलानिधे ! मां कथय, हिमांशो ! मामुदीरय

अस्ति व्यथा– 'गता शान्तिर्हृदः कस्याः कृते कथम् ?
कस्याः प्रेम हृदि प्राप्तं ?, विस्मर्तुं यन्न शक्यते
कलानिधे ! मां कथय, हिमांशो ! मामुदीरय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुनसान रातमा

सुनसान रातबिचमा निहुराइ चाँदलाई
लज्ज्यायो जुन रूपले सक्तीन भन्नलाई

जसले जुधायो आँखा तस्वीर गरी जमाई
उसले मचायो खलबल यो दीलबीच आई

जसले पठायो हाँसो दुइ ओठ नै हँसाई
उसले बहायो आँसु यी नैन दुई रुवाई

थाम्छु म दील होसले भन्छु हुँदैन खोई
उसले गऱ्यो यो हालत एकवारमै मलाई

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शून्यरात्रौ

यस्याः सुन्दरता शून्येऽर्धरात्रे तं कलानिधिम्
नतशीर्षमकार्षीत्, तां नाऽहं वर्णयितुं क्षमः

अयोजयद् दृशौ दृग्भ्यां या स्थिरीकृत्य चित्रवत्
उपेयुषी मनसि मे साऽतनोद् व्याकुलस्थितिम्

दन्तच्छदौ हासयन्ती प्रैषयद् या मधुस्मितम्
रोदयन्त्यक्षिणी सैवाऽवाहयत् नयनोदकम् !

संस्थापयानि हृदयं, नाऽस्त्यव मम तद् वशे
तत्कालमेव हि कथं मामनैषीरिमां स्थितिम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म आउनेछु तिमीलाई भेट्न

"म आउनेछु तिमीलाई भेट्न प्रिये !"

ग्रीष्मको त्यो उग्र घाममा, बर्सातको घनघोर पानीमा
रात अंधेरी , आँधीबिचमा, तारादीप बनाई
म आउनेछु ०

भीषण जाडो सही शीतमा बज्र परे पनि बिच छातीमा–
कदम कदमको विघ्न हटाई बिजुली दीप बनाई
म आउनेछु ०

कठिन चाहे जति छ बाटो चाहे मृत्यु नै भेटूं सामुमा–
हच्कने यो छैन कदापि हिम्मत दीप बनाई
म आउनेछु ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आगमिष्यामि त्वया संगन्तुम्

"आगमिष्यामि संगन्तुम् त्वया सार्धमहं प्रिये !"

ग्रीष्मातपे तीव्रतापे, वर्षाऽऽसारे च भीषणे
तारकादीपमुद्दीप्य तमिस्रायां महानिले
आगमिष्यामि संगन्तुं त्वया सार्धमहं प्रिये !

सोढ्वाऽपि भीषणं शैत्यं, वज्राघातं च वक्षसि
विद्युद्दीपः प्रतिपदम् अन्तरायान् निवारयन्
आगमिष्यामि संगन्तुं त्वया सार्धमितः प्रिये !

कामं मार्गोऽस्तु कठिनो, यद्वाऽऽस्तां मृत्युसङ्गमः
श्रितः सुनिश्चलावस्थां धृतसाहसदीपकः
आगमिष्यामि संगन्तुम् त्वया सार्धमहं प्रिये !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अचानक एक भेटैमा

अचानक एक भेटैमा कसोरी ताकि तीर छाड्यौ
बनाई दिल निशाना यो बताऊ के नफा पायौ ?
अचानक ० ...

सरमले केही त्यस बेला नुहेको थ्यो हंसिलो मुख,
दिई मन्जूर आँखाले बताऊ हाल के पाऱ्यौ ?
अचानक० ...

न थे अरू कोही त्यहाँ थियो सुनसान त्यो ठाउँ
मिलेको ओठ ओठैमा के विसौंला भनी ठान्यौ ?
अचानक० ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अकस्मादेकस्मिन्नेव संगमे

सहसा सङ्गमे नूत्ने शरव्यी[1]कृत्य मे मनः
अमुञ्चस्त्वं कथं बाणं ? का नु लब्धिरतस्तव ?
सहसैव कथं बाणम् अमुञ्चो नव-सङ्गमे !

आनतं सस्मितं चाऽसीत् तदानीं ते मुखं ह्रिया
दत्त्वा स्वीकृतिमक्षिभ्याम् अकृथाः कां दशां मम ?
सहसैव कथं बाणम् अमुञ्चो नव-सङ्गमे !

तत्र निर्जनशून्ये स आवयोः ओष्ठसंगमः
विस्मर्तुं शक्यत इति प्रिये ! किं त्वममन्यथाः ?
सहसैव कथं बाणम् अमुञ्चो नव-संगमे !

---

१. शरव्यीकृत्य=लक्ष्यीकृत्य । लक्षं लक्ष्यं शरव्यं चेत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शरणागतको पुकार

मनले धाई आएँ प्रभु ! अब तिम्रै मन्दिर आएँ ।
खाली हातलें शान्ति आश ली धाई मन्दिर आएँ ।।

अर्पणलाई जल–पात्र संम नपाई
वहंदो मन–गङ्गा–जलसाथ, दुइ नेत्र भरीकन ल्याएँ ।।

पूजालाई धूप, दीप, फूलसंम नपाई
हृदयथालमा भक्ति–पुष्प ली, खाली हात म आएँ ।।

भेटलाई पनि द्रव्य केही नपाई
तिम्रै धन यो साथ छुटेको जीवन भेटी चढाएँ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शरणागतस्य करुणाऽभ्यर्थना

प्रभो ! श्रान्तो हृदाऽऽगच्छम्, आगच्छम् तव मन्दिरम्
शान्त्याशया समागच्छं रिक्तहस्तेन मन्दिरम्

अर्पणार्थम् अलब्ध्वैव जलपात्रं, समानयम्–
समनःस्वर्धुनीतोये अश्रुपूर्णे विलोचने

धूपं, दीपं, प्रसूनं च पूजार्थे प्राप्तुमक्षमः
हृत्स्थालभक्तिकुसुमो रिक्तहस्तः समागमम्

अर्पणायाऽनवाप्यैव किञ्चिद् द्रव्यं, मया सह
स्थितं द्रव्यं तवैवेदम् आर्पयम् स्वस्य जीवनम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा, ए पथिक जा !

"जा, ए पथिक ! जा–
टुक्रिएको दिल यो बटुली, साथै लिएर जा"–

हाँसोले त्यो ओठमै बस्न राजी भो त के
रोएर यो देखा–

मिल्नु खालि चार नयन, बग्नु आँसु हो कि भन्,
जा, ए पथिक ! जा

दामिनीसरि पलक मात्र नेत्र चारले
सुस्त भेटेथे–

कि, त्यो थियो इशारा भन्, देखेर बिर्सनु कठै,
जा, ए पथिक ! जा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गच्छ त्वं हे पथिक !

"गच्छ त्वं हे पथिक !
संगृह्यैतान् पथिक ! हृदंशान् शतधा भग्नान्, सह नय, गच्छ ! "–

तस्या अधरे तिष्ठतु हास्यम्
किन्तु रुदित्वा दर्शय, कथय
किं नेत्रचतुष्टयमिलनं[1] तत्
केवलमश्रुस्रुतये भवति ?–– गच्छ त्वं हे पथिक०

तडिदिव चञ्चलमक्षिचतुष्टय–
मिलनं केवलमभवत् मन्दम् ।
हन्त ! किमेतत् समकेतयत ?––
"दृष्टं तद् विस्मरणीयमिति" ?–– गच्छ त्वं हे पथिक ! ०

---

१. घञर्थकान्तात् मिल इति प्रातिपदिकात् धात्वर्थे णिचि ल्युट् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संकल्प

वास दिए भने मनमा भैगो, लात दिए पनि सहे है आँसु !
जमी बस् उसको दिलमा यसरी! , आँसु बनी मात्र निस्की !
निकाले

पुकार केही मनको सुनिदिने छन् के कोही ?
दुःखी तँ आँसु खालि, सुनिदिने छस्, भए कोही !

व्यर्थ नबग् है बिन्ति छ, मेरो, उसको दिल गइ भर् बरु है
लड्दै खस्छस् बूँद बूँद भै, मुटुको पानी बनेर व्यर्थै !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संकल्पः

अश्रु ! प्राप्ते तद्धृदि वासे, लत्ताऽऽहतिमपि तां विषहस्व,
एवं स्थैर्यं भज, निर्गमितेऽप्यश्रूभूयैव हि निर्गच्छ !

को वा शृणुयान्मम हृदयस्थं करुणं विलपितमद्य दृगम्बु !
यदि कोऽपि भवेदाकर्णयिता केवलमेकं दुःखि त्वमसि !

मत्प्रार्थितमस्त्येवं--वितथं मा वह, गत्वा तस्या हृदयम्
पूरय, किं भो ! हृत्सलिलं सत् पृषदाकारं स्खलितं पतसि !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साथी न ता कोही थे

साथी न ता कोही थे ठाउँ थ्यो सत्य शून्य
खाली थ चाँद तारा मध्य थ्यो रातलाई

घुमिरहेथे आँखा धड्किरहेथ्यो छाती
शायद उले कुरेथ्यो उसलाई भेट्नलाई

तर्सन्थ्यो नि उ आफैं जब श्वास लामो चल्थ्यो
हर पल हुंदै गएथ्यो युग युग हरे, उलाई

देख्थ्यो हजारौं बाजी, जसलाई हेर्न खोज्थ्यो,
जान्थे ती सब मनैका कल्पना हुंदै बिलाई

तर्सन्थ्यो मनमनै ऊ दखी भ्रम हजारौं,
रुनु न हाँस्नु कैले हुन्थ्यो हरे उलाई

मन पर्थ्यो नि कहाँ त्यो ज्योति पनि त्यो जुनको
जसले कति पटक ता देखायो रूप भुलाई

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाऽसन् केऽपि सखायः

नाऽसन् केऽपि सहायाः, तत् स्थलमासीद्धि निर्जनम्
आसीन्निशीथो, भान्ति स्म केवलं चन्द्रतारकाः

भ्रमदासीत् नेत्रयुग्मं स्पन्दमानं च हृन्मुहुः
संभवेत्, संजिगमिषुः सन् स तां प्रत्यपालयत्

यदा मात्राधिकः श्वासश्चलति स्म तदा तु सः
त्रस्यति स्म स्वयं हन्त ! युगायन्ते स्म च क्षणाः

सहस्रकृत्व ऐक्षिष्ट स यां समदिदृक्षत
विलीयन्ते स्म चैतस्य या आसन् कल्पना हृदि !

त्रासं याति स्म स परःसहस्रान् वीक्ष्य तान् भ्रमान्
हसितव्यं रोदितव्यं वेति जातु व्यकल्पत

अस्मै नाऽरोचत ज्यौत्स्नमपि ज्योतिर्यतः कति-
वारान् एनं च्छलयितुं तत् स्वरूपमदर्शयत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुखेको दिल, टुटेको मन

दुखेको दिल टुटेको मन दुखेर चूर चूर भो नि
थियो आशा संधै जसको उ उस्तै नै संधै भो नि !

न थामूँ यो फुटेको दिल, न ठानूँ कर्म नै यस्तो,
साटूँ त्यो निठुरी मन, न आटूँ यो भयो कस्तो !

झरेको फूल, फुलेको फूल, दुबै हुन् फूल ता फूलै
झरेको यो फुलेको ऊ, भयो कोशिश सबै व्यर्थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सव्यथं हृदयं, भग्नं मनः

सव्यथं हृदयं, भग्नं मनो दुःखेन चूर्णितम्
यस्याम् आशा सदा बद्धा साऽजस्रं प्रकृतौ स्थिता !

सहै भग्नं मनः, कर्मफलं मन्यै, यतै उत
परिदातुं निष्ठुरं हृत्,--जातमेतन्नु कीदृशम् !

किं विशीर्णं किञ्च फुल्लं ! पुष्पमेवोभयं हि तत्
एतद् विशीर्णं, तत् फुल्लम्, ! अभूत् यत्नोऽखिलो वृथा !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अव्यक्त पीडा

सल्केको भित्र तापले
जिउंदै जलायो के के,
पर्दा पछाडि खामोस्
दिलमा छ मेरो के के ।। सल्केको ...

मुस्लो धुवाँले बन्द छ मुख यो
आशा छंदै पनी दिल भो खरानी
पत्थर समाज सामु–
पर्वाह आँसुको के । सल्केको ...

जिन्दगी पनि भार भै अब,
फेर्छु श्वासमा दुःखकै कहानी
खानी सरी लुकेको दिलमा छ मर्म के के ।
सल्केको ... ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अव्यक्तपीडा

अन्तर्ज्वलितस्तापो–
ऽज्वलयज्जीवदेव किमपि तद्वस्तु
अन्ते च सावधान–
स्थितौ मनसि किंकिमस्ति मे भातम् –अन्त०

पिहितं धूमचयेन
मुखमाशावदपि, भस्म हृज्जातम्
प्रस्तरसदृशसमाजे
का गणना भवति नत्रसलिलस्य ! –अन्त०

प्राणा भारायन्ते,
तन्मे श्वासेऽपि सन्ति दुःखकथाः
अन्तर्भवन्ति खनिवत्
मम हृदये कानि कानि मर्माणि ! –अन्त०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकान्तको गीत

संझनाको धारले, कल्पनाको छातीमा
पाऱ्यो छिया मायाले, सपनी जुनीमा ।

पूर्णिमाको रातमा, गर्मीको याममा
बादलुले पोखेको, सिसिमे पानीमा । संझना ...

त्यो नीलो नभमा, बादलुको आडमा
चन्द्रमाको चाँदनी, पर्वतमालामा

मादलुको तालमा, बाँसुरीको सुरमा
सुस्केरामा गीत भरी रमैलो रातमा

बारीको आलीमा, सुन्सान रातमा
बोल्छ चरी छेउको ऐसेलु घारीमा– संझना ... ...

चीसो चीसो बतासमा, खोलाको तीरमा,
नाची नाची घुम्छ को हुँ ? आँखाको नानीमा– संझना ... ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकान्तगीतम्

जीवनेऽस्मिन् स्वप्नमये स्मृत्या निशितधारया
अच्छिद्रयत्तमां प्रेम कल्पनाया उरो मम

पूर्णिमाया निशीथिन्यां समये ग्रीष्मतापिते
निपातिते जलमुचा मन्दमन्दे च वर्षणे –जीवने०

आकाशे नीलिममये सन्निकृष्टौ तडित्वतः
सा ज्योत्स्ना रजनीशस्य तासु पर्वत–राजिषु !

मृदङ्गतालमाश्रित्य तथा वंशीलयं च तम्
श्वसिते गीतिमापूर्य रामणीयकवन्निशि

वाटिकाया आलिकायां सर्वशून्ये निशाक्षणे
निकटेऽर्गट[1]गुल्मस्थः संकूजति विहङ्गमः –जीवने०

शीतशीते हि पवने, तस्मिन् स्रोतस्विनीतटे
नर्तं नर्तं भ्रमति का ? श्रितनेत्रकनीनिका ! –जीवने०

---

१. अर्गटः = ऐसेलु इति नेपाल्याम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वदेशी गान

वन्दीपुरे उकालो लामो मर्स्याङ्दी डुङ्गाले तरेर
बनबनै ढाकेर फुल्ने लालपाते झुलेको देखेर
कोइलीको पुकारसाथै रानीचरी भुरूरु उडेर
मनमनै संझाइ हिउँले पनि चिसो बतास छरेर
हरिणका झैं ठूला आँखा गाजलुले कुनैमा कोरेर
मिलनको मधुर बेला सपनीमा आउने कल्पेर

दिनभरि उकाली उक्ली फेरि वर्ली ओरालो झरेर
खोलाखोलै हिंडेर कहिले हात झारी पसीना पुछेर
पिपलको चौतारामाथि झसकाई न्याउली बोलेर
मिठो पिठो जो मिल्यो खाई दिल खोली कुभलो फालेर
हरिणका झैं ठूला आँखा गाजलुले कुनैमा कोरेर
मिलनको मधुर बेला सपनीमा आउने कल्पेर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वदेश्यं गानम्

विकटारोहो बन्दिपुरस्य स ! तां मर्स्याङ्दीं नावोत्तीर्य,
व्याप्य वनाद्वनमानतपुष्पं रक्तदलानां व्रातं वीक्ष्य,
पीत्वा कोकिलकूजितमधु तत् 'रानि' विहङ्गोड्डयनं वीक्ष्य,
तुहिनेन स्मारित इव किञ्चित् शिशिरसमीरं तं प्रविकीर्य,
आपाङ्गं हरिणायतनेत्रे कज्जलसंयोगेन विभूष्य,
स्वप्ने तन्मिलनस्य सुयोगं माधुर्यमयं हृदि परिकल्प्य ।

आरोहणपथमुत्तीर्य दिनं, पुनरवरोहणपथमवतीर्य,
जातु च सरितः सरितं गत्वा, हस्तनिपातं स्वेदं प्रोञ्छ्य,
अधिपिप्पलचत्वरमध्यास्य, त्रस्तं कौररवमाकर्ण्य,
भोज्यं भुक्त्वा च यथामिलितं, प्रोद्घाटच मनः, कलुषमपास्य,
आपाङ्गं हरिणायतनेत्रे कज्जलसंयोगेन विभूष्य,
स्वप्ने तन्मिलनस्य सुयोगं माधुर्यमयं हृदि परिकल्प्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(२)

हराभरा देखिने सारा, नदीनाला पर्वत सम्थर,
हिउँदमै वसन्त पारी हाँसी नाच्छन् खुकुरी भिरेर,
गण्डकीको रमणीय छाल, साथ तालै मादलु ठोकेर,
गाइनेले मायालु गीत भरि गाउंछन् सारंगी रेटेर,
हरिणका झैं ठूला आँखा गाजलुले कुनैमा कोरेर,
मिलनको मधुर बेला, सपनीमा आउनें कल्पेर

डाँडामाथि चन्द्रमाभित्र पनि तिमी निहाली संझेर,
साँझ पऱ्यो बास है बस्यो, जिन्दगीको त्यो छिन छाँटेर,
प्रकृतिले रचेको रिमझिम पारी पूर्ण धनैले भरेर,
पृथिवीमा बनेको स्वर्ग होभने लौ ! छ हेर नेपाल,
हरिणका झैं ठूला आँखा, गाजलुले कुनैमा कोरेर,
मिलनको मधुर बेला सपनीमा आउने कल्पेर ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्वा सरितः, शस्यैर्हरिता गिरिसमभूमीश्च, मधूकृत्य–
हिममासानप्यसिधेनुं तां धृत्वा, हसतो नटतो वीक्ष्य,
सार्धं सरितो रुचिरतरङ्गैः, तालं मार्दलमप्यायोज्य,
प्रीत्या सिक्तं गीतं भृत्वा हचुपवीणयतो गातॄन् वीक्ष्य,
आपाङ्गं हरिणायतनेत्रे कज्जलसंयोगेन विभूष्य,
स्वप्ने तन्मिलनस्य सुयोगं माधुर्यमयं हृदि परिकल्प्य ।

शैलोपरि चन्द्रान्तरपि त्वां संभाव्य, प्रेक्ष्य च संस्मृत्य,
सन्ध्येति स्वो वासो रचितो, जीवनघटिकां तां हि विशेष्य,
प्रकृतीच्छातः सालङ्कारं रचितो विभवैस्तैः परिपूर्य,
भूमौ स्वर्गो यदि कोऽपि भवेत्, अस्ति हि नेपालस्तं पश्य !
आपाङ्गं हरिणायतनेत्रे कज्जलसंयोगेन विभूष्य,
स्वप्ने तन्मिलनस्य सुयोगं माधुर्यमयं हृदि परिकल्प्य ![1]

---

१. अस्मिन् सन्दर्भे प्रत्येकं कवितासु 'एवं कश्चित् विरही गच्छति' इति संयोजनीयम्, मूलकवितासु क्रियापदाभावात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आखिरमा

भूल प्रयासमै हुन्छ, त्यो प्रकृति हो । भूल संधै भूलै भइरहन्न । त्यै सफलताको सूचक पनि हुन्छ । भूललाई भूलेर भूलसुधार गर्नु नै मानवताको महान् लक्ष्य हो । त्यै क्षमा हो, शान्ति हो, अद्वैत, समता पनि,

तसर्थ यदि–

यो सानु प्रयासमा कुनै भूल भए, त्यो प्रकृतिमै बिलाओस् !

–लेखक

इति शम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्ततः

प्रयासे एव हि संभवति प्रमादः, सैषा प्रकृतिः। नैव तावत् प्रमादत्वेनैवाऽवतिष्ठते सदा प्रमादः। यतः स एव सूचकोऽपि भवति सफलतायाः। प्रमादम् पराभूय तत्समाहितिरेव हि मानवताया महदुद्देश्यम्। सैव हि क्षमा नाम! शान्तिः, अद्वैतम्, समता वा।

तद्यदि--

उपलभ्येत कश्चित् प्रमादोऽस्मिन् अल्पप्रयासे, सोऽपि विलीयतां प्रकृतावेव!

—लेखकः

इति शम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुद्रकः– श्री ५ को सरकारको छापाखाना, काठमाडौं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu